दीनांसिद्धये उत्तरपदलोपस्योपसंख्यानम् शाकप्रियःपार्थिवःशाक
पार्थिवःदेवब्राह्मणः सन्महत्परमोत्कृष्टाःपूज्यमानैः सद्वैद्यः वसमाण।
नमहत्तः श्राकारःमहावैयाकरणः पूज्यमानैःकिम् उत्कृष्टोगौः पङ्का

ड्यनङ्समर्थे। वृन्दारकनागकुञ्जरैः पूज्यमानम् गोवृन्दारकः व्याघ्रादेराकृ

तिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनम् कतरकतमौ जातिपरिप्रश्ने ॥

कतरकठः कतमकलापः गोत्रं च चरणैः सहेति जातित्वम् किंक्षेपे कुत्सितो

राजा किंराजा यो न रक्षति पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेह

द्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः तत्पुरुषः समानाधिकरण ः

कर्मधारयः पुंवत्कर्मधारयजातीयदेशीयेषु कर्मधारयेजातीयदेशीययो

सि०
कौ०
१६१

श्चपरतोभाषितपुंस्कादनूङूङभावोयस्मिं स्तथाभूतंपूर्वंपुंवत् पूरणीप्रि
यादिष्वपरमः पुंवद्भावोविधीयते महानवमी कृष्णचतुर्दशी महाप्रिया
तथाकोपधादेः प्रतिषिद्धः कर्मधारयादौप्रतिप्रसूयते पाचकस्त्री पञ्चम
भार्यादत्तभार्या स्वौघ्नभार्या सुकेशभार्याब्राह्मणभार्या एवंपाचकजाती
यापाचकदेशीयेत्यादि इभपोटापोटास्त्रीपुंसलक्षणाऽइभयुवतिः अग्निस्तो
कः उदश्वित्कतिपयम् गृष्टिः सकृत्प्रसूता गोगृष्टिः धेनुर्नवसूतिका गोधेनु ः

४२

१६१

तरुणवत्सा

वशावन्ध्या गोवशा वेहद्गर्भघातिनी गोवेहत् वष्कयिणी गोवष्कयिणी क

ठप्रवक्ता कठश्रोत्रियः कठाध्यापकः कठधूर्त्तः प्रशंसावचनैश्च ऐतैः महा

जातिः प्रागवत् गोमतल्लिका गोमचर्चिका गोप्रकाण्डं गवोद्धः गोतल्लजः प्र

शस्ता गौरित्यर्थः मतल्लिकादयो नियतलिङ्गाः न तु विशेष्यलिङ्गाः जातिः किं

कुमारी मतल्लिका युवा खलति पलित वलिन जरतीभिः पूर्वनिपातनियमा

र्थं सूत्रम् लिङ्गविशिष्टपरिभाषया युवतिशब्दोपि समस्यते युवा खलतिः यु

वावलतिः युवतिः खलती युवखलती युवजरती युवत्यामेवजरती धर्मे।
पलम्भेनतद्रूपारोपात्सामानाधिकरण्यम् कृत्यतुल्याख्याअजात्या भोज्योष्णं
तुल्यश्वेतः महाश्वेतः अजात्याकिं भोज्यउोदनः प्रतिषेधसामर्थ्याद्विशेष
णसमासोपिन वर्णोवर्णेन समानाधिकरणेनसहप्राग्वत् कृष्णसारङ्गः
कडाराःकर्मधारये कडारादयः शब्दाःकर्मधारयेवापूर्वंप्रयोज्याः कडार।
जैमिनिः जैमिनिकडारः कुमारःश्रमणादिभिः कुमारीश्रमणा कुमारश्र

मणा इहगोश्रमणा प्रव्रजितागर्भिणीत्यादयःस्त्रीलिङ्गाःपठ्यन्ते लिङ्ग

विशिष्टपरिभाषायापन्नदेवत्तापकंबोध्यम् चतुष्पादोगर्भिण्या चतुष्पा

ज्जातिवाचिनः गर्भिणीशब्देनसहप्राग्वत् गोगर्भिणी मयूरव्यंसकादय

श्च एतेनिपात्यन्ते मयूरोव्यंसकोमयूरव्यंसकः व्यंसकोधूर्तः उदक्चाव

वाक्च उच्चावचं निश्चितंचप्रचितंचनिश्चप्रचम् नास्तिकिञ्चनयस्यसअकि

ञ्चनः आख्यातमाख्यातेनक्रियासातत्ये अश्नीतपिबतेत्येवंसततंयत्राभि

सि॰
कौ॰
१९३

पीयते साश्नीतपिबता पचतभृज्जता खादतमोदता एहीडादयोन्यपदा।
र्थे एहीडइतियस्मिन्कर्मणितदेहीडम् एहियवं उद्धरकोष्ठान् उद्धरसृजेदे
हीतियस्यांक्रियायांसाउद्धरोत्सृजा उद्धमविधमा श्रमानन्यार्थमिहपाठः
जहिकर्मणाबहुलमाभीक्ष्ण्येकर्त्तारंचाभिदधाति जहिकर्मणाबहुलंसम
स्यते आभीक्ष्ण्यगम्ये समासेनचेत्कर्त्ताभिधीयतेइत्यर्थः जहिजोडः जहिस्त।
म्बः नास्तिकुतोभयंयस्यसोकुतोभयः अन्योराजा राजान्तरं चिदेव चिन्मात्र

त्रम् ईषदकृता ईषत्पिङ्गलः ईषद्गुणवचनेनेतिवाच्यम् ईषद्रक्तम् नञ् न

ञ् सुपासमस्यते नलोपोनञः नञोनस्यलोपःस्यात् उत्तरपदे अब्राह्मणः

तस्मान्नुडचि लुप्तनकारान्नञउत्तरपदस्याजादेर्नुडागमःस्यात् अनश्वात्र

र्थाभावेऽव्ययीभावेन सहार्थविकल्प्यते स्नातोऽह्नागमस्तत्पुरुषसन्देहः प्रयोज

नमिति असद्भुतायामसंहितमितिभाष्यवार्तिकप्रयोगात् तेनानुपलब्धिरवि

वादोविघ्नमित्यादिसिद्धम् नञोनलोपस्तिङि क्षेपे अपचसित्वंजाल्म नैक

सि॰
कौ॰
१९५

धेयत्वादौ तु न अहेन समुपेति समासः नभ्राण्नपान्नवेदानासत्यानमुचिनकुल

नखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या एषु नञ् प्रकृत्या स्यादिति भ्राजन्तः वेदा

इत्यसबन्तः नसत्या असत्याः नअसत्याः नासत्याः नमुञ्चतीति नमुचिः न

कुलमस्य नखमस्य नस्त्रीपुमान् स्त्रीपुंसयोः पुंसकभावो निपातनात् न क्षर

तीति नक्षत्रम् क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते नक्रामतीति नक्रः क

मेडः नअकमस्मिन्निति नाकः नगोऽप्राणिष्वन्यतरस्यात् नगइत्यत्र नञ् प्रकृ

त्या नगाः अगाः पर्वताः अप्राणिषु किं अगोवृषलः शीतेन निसंक्रीडेत्य
तोनित्यमित्यनुवर्तमाने कुगतिप्रादयः एतेसमर्थेननित्यंसमस्यन्ते कुत्सि
तः पुरुषः कुपुरुषः गतिश्चेत्यनुवर्तमाने ऊर्यादिच्विडाचश्च एतेक्रियायो
उररीकृत्य
गेगतिसंज्ञाःस्युः ऊरीकृत्य शुक्लीकृत्य पटपटाकृत्य कारिकाशब्दस्योपसं
ख्यानम् कारिकाक्रिया कारिकाकृत्य अनुकरणंचानितिपरम् खाट्कृत्य अ
नितिपरंकिम् खाडितिकृत्वानिरष्ठीवत् आदरानादरयोः सदसती सत्कृत्य

सि॰
कौ॰
१६५

अप्रमत्तस्य भूषणेऽलम् अलङ्कृत्य भूषणे किम् अलङ्कृतोदनं गतः पर्याप्तमि
त्यर्थः अन्तकरणमित्यादि त्रिस्वभावात्कृत्स्नविषया अन्तरपरिग्रहे अन्तर्हत्य
मध्येहत्वेत्यर्थः अपरिग्रहे किं अन्तर्हत्वा गतः हतं परिगृह्य गत इत्यर्थः क
णेमनसीश्रद्धाप्रतीघाते कणेहत्य पयः पिबति मनोहत्य क णेपात्‌ सप्तमी
प्रतिरूपको निपातोऽभिलाषातिशये वर्तते मनःशब्दोप्येवमेव पुरोऽव्ययम् पुर
स्कृत्य अस्तं च अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात् अस्तङ्गत्य अच्छगत्य

४८

र्थवदेषु अव्ययमित्येव अच्छगत्य अच्छोद्य अभिमुखं गत्वा उक्त्वा चेत्यर्थः अव
व्ययं किम् जलमच्छं गच्छति अदोऽनुपदेशे अदःकृत्य अदःकृतम् परं प्रत्युपदेशे प्र
त्युदाहरणम् तिरोऽन्तर्धौ तिरोभूय विभाषा कृञि तिरस्कृत्य तिरःकृत्वा उपा
जेऽन्वाजे एतौ कृञि वा गतिसंज्ञौ उपाजेकृत्य अन्वाजेकृत्य उपाजेकृत्वा अन्वा
जेकृत्वा दुर्बलस्य बलमाधायेत्यर्थः साक्षात्प्रभृतीनि च कृञि वा गतिसंज्ञा
नि स्युः च्व्यर्थे इति वक्तव्यम् साक्षात्कृत्य साक्षात्कृत्वा लवणंकृत्य लवणंकृत्वा

सि॰
कौ॰
१९९

मान्तत्वं निपातनात् अनत्याधान उरसिमनसी उरसिकृत्य उरसिकृत्वा अ

मनसिकृत्य

भ्युपगम्येत्यर्थः मनसिकृत्वा निश्चित्येत्यर्थः अत्याधानमुपश्लेषणं तत्र न उरसि

कृत्वा पाणिं शेते मध्येपदेनिर्वचने च एते कृञि गतिसंज्ञा वा स्युः अनत्याधाने

मध्येकृत्य मध्येकृत्वा पदेकृत्य पदेकृत्वा निर्वचनेकृत्य वाचं नियम्येत्यर्थः नित्यं

हस्तेपाणावुपयमने कृञि उपयमनं विवाहः स्वीकारमात्रमित्यन्ये हस्तेकृत्य पा

णौकृत्य प्राध्वं बन्धने प्राध्वमित्यव्ययम् प्राध्वंकृत्य बन्धनेनानुकूलं कृत्वेत्य

र्थः प्रार्थनादिनानानुकूल्यकरणेप्रार्थंकृत्वा जीविकोपनिषदावौपम्ये ॥

जीविकामिवकृत्वा जीविकाकृत्य उपनिषत्कृत्य औपम्येकिम् जीविकांकृ-

त्वा प्रादिग्रहणमगत्यर्थम् सुपुरुषः अत्रवार्तिकानि प्रादयोगताद्यर्थेप्रथ-

मया प्रगतआचार्यः प्राचार्यः अत्यादयः क्रान्ताद्यर्थेद्वितीयया अतिक्रा-

क्रुष्टा

न्तोमालामतिमालः अवादयः [illegible] द्यर्थेतृतीयया अवक्रुष्टः कोकि-

लया वकोकिलः पर्यादयोग्लानाद्यर्थेचतुर्थ्या परिग्लानोध्ययनाय पर्य

सि॰
कौ॰
९७

ध्ययनः निरादयः क्रान्ताद्यर्थे पञ्चम्या निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः
कर्मप्रवचनीयानां प्रतिषेधः वृक्षंप्रति तत्रोपपदं सप्तमीस्थम् सप्तम्यन्ते पदे
कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात् तस्मिं
न्सत्येव वक्ष्यमाणप्रत्ययाः स्यात् उपपदमतिङ् उपपदं सुबन्तं समर्थेन नित्यं
समस्यते तिङन्तश्चायं समासः कुम्भं करोतीति कुम्भकारः इह कुम्भ अस् कार इ
त्यलौकिकं प्रक्रियावाक्यम् अतिङ् किं मा भवान्भूत् माङि लुङि सप्तमी।

४८

९७

निर्देशात्तस्मात् उपपदम् अतिङ् ग्रहणं ज्ञापयति सुपेत्येतन्नेहानुवर्त्तते इति सु

बन्तेपिगतिग्रहणं पृथक्कृतमतिङ्ग्रहणं तत्रापकृष्यते सुपेतिवनिवृत्तेनयावग

तिकारकोपपदानां कृद्भिः सहसमासवचनम् प्राक्सुबुत्पत्तेरिति सिद्धम् यात्री

श्वक्रीती कच्छपी अमैवाव्ययेन अमैवतुल्यविधानंयदुपपदंतदेवाव्ययेनस

हसमस्यते स्वादुङ्कारंभेद्दकालसमयवेलासुतुमुन् कालःसमयोवेलावाभोक्तु

म् अमैवेतिकिम् अग्रेभोजम् अग्रेभुक्त्वा विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ॥

प्रमावान्येनवत्तुल्यविधानमेतत् तृतीयाप्रभृतीन्यन्यतरस्याम् ।उपदंशस्तृती
यायामित्यादीन्युपपदान्यमन्तेनाव्ययेनसहवासमस्यन्ते मूलकेनोपदंशंभुंक्ते।
मूलकोपदंशम् क्त्वाच तृतीयाप्रभृतीन्युपपदानिक्त्वान्तेनसहवासमस्यन्ते ।उ
च्चैःकृत्य उच्चैःकृत्वा अव्ययेयथाभिप्रेतेतिक्त्वान्ततृतीयाप्रभृतीतिकिम् अलंकृत्वा
खलुकृत्वा तत्पुरुषस्याङ्गुलेःसंख्याव्ययादेः संङ्ख्याव्ययादेरङ्गुल्यन्तस्यतत्पुरुष
स्यसमासान्तोचस्यात् द्वेअङ्गुलीप्रमाणमस्यद्व्यङ्गुलंदारु निर्गतमङ्गुलिभ्योनि

रङ्गुलम् अह्नः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः एभ्यो रात्रेरच् स्यात् चात्सङ्-

ख्याव्ययादेः अहर्ग्रहणं द्वन्द्वार्थम् अहश्च रात्रिश्च अहोरात्रः सर्वरात्रः पूर्वरात्रः

संख्यातरात्रः द्वयो रात्र्योः समाहारः द्विरात्रम् अतिक्रान्तो रात्रिमतिरात्रः राजा

हः सखिभ्यष्टच् एतदन्तात्तत्पुरुषात् टच् स्यात् परमराजः अतिराजी कृ

ष्णसखः अह्नष्टखोरेव अह्नष्टखोरेव टिलोपः स्यान्नान्यत्र उत्तमाहः द्व्यह्नः

नीभूतो द्व्यहीनः तद्धितार्थे द्विगुः नमथीष्टस्यापि कारे द्विगोर्विन्यन्तहलो रा

सि० कौ० १८५

अह्नः संवत्सरात्रेति वाः लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नेह मद्राणां राज्ञी
मद्रराज्ञी अह्नोऽह्न एतेभ्यः सर्वादिभ्यः परस्याह्न शब्दस्याह्नादेशः स्यात् समा-
सान्ते परे अह्नोऽदन्तात् अदन्तपूर्वपदस्थाद्रेफात्परस्याह्नो नस्य णः स्यात् सर्वा-
ह्णः पूर्वाह्णः संख्याताह्नः द्वयोरह्नोर्भवः कालाह्ने द्विगोर्लुगनपत्ये इति
ठञो लुक् द्व्यह्नः स्त्रियामदन्ततया टाप् द्व्यह्ना द्व्यह्नप्रियः अत्यह्नः त्वश्रादिष्व
व पक्षणत्वं न स्यात् दीर्घाह्नी प्रावृट् एवं चैतदर्थमह्नष्टखदन्तानुकरणं के

५०

ग्रोनकर्त्तव्यः प्रातिपदिकान्तेतिणत्वनिवारणाय दन्त्यादिपाठस्यावश्यकत्वा

त् प्रदन्त्यादितितपरकरणान्नेह परागतमहः पराह्णः नसङ्ख्यादेःसमाहा

रे समाहारेवर्त्तमानस्यसङ्ख्यादेरह्नादेशोनस्यात् संख्यादेरितिस्पष्टार्थ्य

म् ह्योरह्नोःसमाहारःद्व्यहः त्र्यहः उत्तमैकाभ्यांच ग्राभ्यामह्नादेशोन उत्त

मपाह्नोन्त्यार्थः पुण्यशब्द[illegible]माह पुण्यैकाभ्यामित्येवन्नसूत्रयितव्यमुचितं पु

ण्याहं सुदिनाहस्य सुदिनशब्दः प्रशस्तवाची एकाहः उत्तमग्रहणमुपान्त्यस्या

सि॰
कौ॰

पि संग्रहार्थमित्येके ॥ संख्यातारः ॥ अग्राख्यायामुरसः टच् स्यात् अश्वानामुर
इव प्रधानम् अश्वोरसम् मुख्योऽश्व इत्यर्थः ॥ अनोऽश्मायःसरसां जातिसंज्ञयोः टच् स्यात्
जातौ संज्ञायां च उपानसम् अमृताश्मः कालायसम् मण्डूकसरसम् इति जा
तिः महानसम् पिण्डाश्मः लोहितायसम् जलसरसम् इति संज्ञा ग्रामकौटाभ्यां
च तक्ष्णः ग्रामस्य तक्षा ग्रामतक्षः साधारण इत्यर्थः कुट्यां भवः कौटः स्वतन्त्रः स
चासौ तक्षा च कौटतक्षः अतेः शुनः अतिश्वो वराहः अतिश्वी सेवा उपमानादप्रा

णिषु प्रशाणिविषयकोपमानवाचिनः पुनः टच्स्यात् प्राकर्षः श्वेवाकर्षप्यः

प्रशाणिषुकिं वानरः श्वेववानरश्वा उन्नरमृगशूर्वाघ्रसमक्षः वाऽपमानात्उ

त्तरसक्थम् मृगसक्थम् शूर्वसक्थम् फलकमिवसक्थि फलकसक्थम् ना

वोद्विगोः नौ शाह्यन्नाद्विगोश्टच्स्यात् ननतद्धितलुकि द्वाभ्यां नौभ्यामागतो

द्विनावरूप्यः द्विगोर्लुगनपत्यइत्यचीत्यप्रापकर्षणाद्धलादेर्नलुक् पंचना

वप्रियः द्विनावं त्रिनावं अतद्धितलुकीतिकिम् पञ्चभिर्नौभिः क्रीतापञ्चनौ ॥

सि॰
कौ॰
१७१

अर्धाच्च अर्धान्नावष्टच्स्यात् नावोर्धमर्धनावम् क्लीबत्वंलोकात् खार्याःप्रा
चाम् द्विगोरर्धाच्चखार्याष्टच्वा द्विखारंद्विखारि अर्धखारं अर्धखारी द्वि
त्रिभ्यामञ्जलेः टच्वास्याद्द्विगौ द्व्यञ्जलंद्व्यञ्जलिभ्यांक्रीतः द्व्यञ्जलिः ब्र
ह्मणोजानपदाख्यायाम् ब्रह्मान्तात्तत्पुरुषाट्टच्स्यात् समासेनजानपदत्वमा
ख्यायतेचेत् सुराष्ट्रेब्रह्मासुराष्ट्रब्रह्मः कुमहद्भ्यामन्यतरस्याम् आभ्यांब्रह्म
णोवाटच्स्यात् तत्पुरुषेकुत्सितोब्रह्मा कुब्रह्मः कुब्रह्मा आन्महतःसमाना

५२

१७१

धिकरणजातीययोः महतआकारोन्तादेशःस्यात् समानाधिकरणेउत्तरप
देजातीयेचपरे महावला महावलाः महादेवाः महाजातीयः समानाधि
करणेकिम् महतःसेवा महत्सेवा लाक्षणिकंविहायप्रतिपदोक्तःसन्महदि
तिसमासोगृह्यतइतिनेह महाबाहुरितिनस्यात् तस्माल्लक्षणप्रतिपदो
क्तयोः प्रतिपदोक्तस्यैवेतिपरिभाषानेहप्रवर्तते समानाधिकरणग्रहणसा
मर्थ्यात् आदितियोगविभागादात्वम् प्रागेकादशाभ्यइतिनिर्देशाद्वा एका

सि. कौ. १७२

दश महतीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावे कृते आत्वम् महाजातीया म

हदात्वेघासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च असमानाधिकरणार्थमि

दम् महतो महत्या वा घासो महाघासः महाकरः महाविशिष्टः अष्टनः क

पाले हविषि अष्टाकपालः गवि च युक्ते गोशब्दे परे युक्त इत्यर्थे गम्येष्टन आत्वं

वक्तव्यमित्यर्थः अष्टागवं शकटम् अष्टम्यनन्वेन्यत्राजिनिति योगविभागा

द्बहुव्रीहावप्यत्र अष्टानां गवां समाहारोष्टगवम् न युक्तत्वान्नकटमप्या

ष्टागवमितिवा द्व्यष्टनःसंख्यायामबहुव्रीह्यशीत्योः आत्स्यात् द्वौचदशच

द्वादशाद्यधिकादशेतिवाद्वाविंशतिः अष्टादश अष्टाविंशतिः अबहुव्रीह्य

शीत्योःकिम् द्वित्राःद्व्यशीतिःप्राक् शतादित्येवम् नेहद्विशतंद्विसहस्रं त्रे

स्त्रयः त्रिशब्दस्यत्रयस्स्यात् पूर्वविषये त्रयोदशत्रयोविंशतिः बहुव्रीहौ

न त्रिर्दशायेषांत्रिदशाः सजर्थेबहुव्रीहिः अशीतौन त्र्यशीतिःप्राक् श

तादित्येवत्रिशतंत्रिसहस्रम् विभाषाचत्वारिंशत्प्रभृतौसर्वेषाम् द्व्यष्टनोस्त्रे

श्च प्रागुक्तं वास्मात् चत्वारिंशदादौ परे द्विचत्वारिंशत् द्वाचत्वारिंशत् अष्टचत्वारिं
शत् अष्टाचत्वारिंशत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् एवं पञ्चाशत् षष्टिसप्त
तिनवतिषु एकादिश्चैकस्य चादुक् एकादिः नञ् प्रकृत्यास्मादेकस्यादुक् आग
मश्च नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात् समासः
अनुनासिकविकल्पः एकेन न विंशतिः एकान्नविंशतिः एकाद्नविंशतिः एको
नविंशतिरित्यर्थः षषउत्वं दतृदशधासूत्तर(पदा)देः ष्टुत्वं च धासु वेति वाच्यम् षोडन् षो

डवा घोटा वड्वा परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः एतयोः परपदस्येव लिङ्गं स्यात्
कुक्कुट मयूर्याविमे मयूरी कुक्कुटाविमौ अर्धपिप्पली द्विगुप्राप्तापन्नालंपूर्व
गतिसमासेषु प्रतिषेधो वाच्यः पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडा
शः प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलं कुमार्यै अलंकुमारिः ।
अत एव ज्ञापकात्समासः निष्कौशाम्बिः पूर्ववदश्ववडवौ द्विवचनमतन्त्रम्
अश्ववडवौ अश्ववडवान् अश्ववडवैः रात्राह्नाहाः पुंसि एतदन्तौ द्वन्द्वतत्पुरु

सि॰
कौ॰
१७५

यौ पुंस्येव अनंतरत्वात्परवल्लिङ्गत्वापवादोऽयं परत्वात्समाहारनपुंसकतां बा
धते अहोरात्रः रात्रेः पूर्वभागः पूर्वरात्रः पूर्वाह्णः द्व्यहः संख्यापूर्वं रात्रं नपुंसक
म् द्विरात्रं त्रिरात्रं गणरात्रं अपथं नपुंसकम् तत्पुरुषइत्येव अन्यत्र तु अपथो
देशः कृतसमासान्तनिर्देशान्नेह अपन्थाः अर्धर्चाः पुंसि च अर्धर्चादयः शब्दाः
पुंसि क्लीबे च स्युः अर्धर्चः अर्धर्चम् ध्वजः ध्वजम् एवं तीर्थशरीरमण्डपयूपदेहा
ङ्कुशपाकलशाइत्यादि जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् एकोऽपि

र्यो वा बहुवद्भवति ब्राह्मणाः पूज्याः ब्राह्मणः पूज्यः अस्मदो द्वयोश्च एकत्वे द्वि

त्वे च विवक्षिते ऽस्मदो बहुवचनं स्याद्वा वयं ब्रूमः अहं ब्रवीमि आवां ब्रूवर

तिवा सविशेषणस्य प्रतिषेधः पटुरहं ब्रवीमि फल्गुनीप्रोष्ठपदानां च नक्षत्रे

द्वित्वे बहुत्वं प्रयुक्तं कार्यं वा स्यात् पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः पूर्वे प्रोष्ठपदे पू

र्वाः प्रोष्ठपदाः नक्षत्रे किम् फल्गुन्यौ माणविके तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे ब

हुवचनस्य द्विवचनं नित्यम् बहुत्वं द्विवद्भवति तिष्यश्च पुनर्वसू च तिष्यपुनर्व

स्. तिष्येतिकिं विशाखानुराधाः नक्षत्रे इतिकिम् तिष्यपुनर्वसवो माणा
वकाः सनपुंसकं समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् परवल्लिङ्गापवादः
पञ्चगवम् दन्तोष्ठम् अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः पञ्चमूली आब
न्तोत्तरपदोवा पञ्चखट्वीपञ्चखट्वम् अनोनलोपश्चवा द्विगुः स्त्रियाम् पञ्चतक्ष
म् पञ्चतक्षी पात्राद्यन्तस्य नपञ्चपात्रं त्रिभुवनम् चतुर्युगम् पुण्यसुदिनाभ्या
मह्नः क्लीबतेष्टा पुण्याहम् सुदिनाहम् सुदिनशब्दोऽत्रप्रशस्तवाची पथःसं

त्वावयवादेः सभादेरवयवादेः परः कृतसमासान्तः पथपादः क्लीबमित्यर्थः

त्रयाणांपन्थांत्रिपथम् विरूपः पन्था विपथम् कृतसमासान्तग्रहणान्नेह

सुपन्थाः सामान्येन नपुंसकम् मृदुपचतिप्रातःकमनीयम् तत्पुरुषोनञ्कर्म

धारयः अधिकारोयम् संज्ञायांकन्थोशीनरेषु कन्थान्तस्तत्पुरुषः क्लीबं।

स्यात्साचेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञासुशमस्यापत्यानिसौशमयः

तेषांकन्थासौशमिकन्थम् संज्ञायांकिम् वीरणकन्था उशीनरेषुकिम् दाक्षि

सि· कौ· १२८

कन्था उपज्ञोपक्रमं तदाद्याचिख्यासायाम् उपज्ञान्तं उपक्रमान्तं च तत्पुरुषो न
पुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमि
ष्टे पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः नन्दोपक्रमं द्रोणः छायाबाहुल्ये छा
यान्तस्तत्पुरुषो नपुंसकं स्यात् पूर्वपदा[illegible]र्थबाहुल्ये इक्षूणां छाया इक्षुच्छा
यम् विभाषा सेनेति विकल्पस्यायमपवादः इक्षुच्छायानिषादिन्य इति त्वा
ङ्· प्रश्लेषो बोध्यः सभा राजामनुष्यपूर्वा राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभा·

सि· ५२ १२८

भान्तस्तत्पुरुषो नपुंसकं स्यात् इनसभं ईश्वरसभं पर्यायस्यैवेष्यते नेह राजसभा च

न्द्रगुप्तसभा अमनुष्यशब्दो रूढ्या रक्षः पिशाचादीनाह रक्षःसभम् पिशाचसभ

म् अशाला च सङ्घातार्थायां सभायां तदन्तस्तत्पुरुषः (ति) क्लीवं स्यात् स्त्रीसभं स्त्रीस

ङ्घात इत्यर्थः अशाला किम् धर्मसभा धर्मशालेत्यर्थः विभाषा सेनासुराच्छा

याशालानिशानाम् एतदन्तस्तत्पुरुषः क्लीवं वा स्यात् ब्राह्मणसेनं ब्राह्मणसेना

यवसुरं यवसुरा (ऊद्यच्छायं) ऊद्यच्छाया गोशालं गोशाला श्वनिशं श्वनिशा तत्पुरुषो।

नञ्कर्मधारयः इमन्नुहन्नेनैनेह दृढसेनो राजा असेना परमसेना इति तत्पुरुषः ॥ शे
षो बहुव्रीहिः ॥ अधिकारोऽयम्। द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समा
सो नोक्तः स शेषः प्रथमान्तमित्यर्थः ॥ अनेकमन्यपदार्थे ॥ अनेकं प्रथमान्तमन्य
स्यपदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः ॥ अप्रथमाविभक्त्यर्थे बहुव्रीहि
विति समानाधिकरणानामिति च फलितम्। प्राप्तमुदकं यं प्राप्तोदको ग्रामः ॥ ऊढ
रथोऽनड्वान्। उपहृतपशू रुद्रः ॥ उद्धृतौदना स्थाली पीताम्बरः वीरपुरुषको ग्रामः

प्रथमार्थेनन्नहेहेदेवेगतः व्यधिकरणानामपिनपञ्चभिर्भुक्तमस्य प्रादिभ्योधा

तुजस्यवाच्योवाचोत्तरपदलोपश्च प्रपतितपर्णः प्रपर्णः नञोस्त्यर्थानांवोत्तर

पदलोपः अविद्यमानपुत्र अपुत्रः अस्तीतिविभक्तिप्रतिरूपकमव्ययम् अस्तिक्षी

रागौः स्त्रियाःपुंवद्भाषितपुंस्कादनूङ्समानाधिकरणेस्त्रियामपूरणीप्रियादि

षु भाषितपुंस्कादनूङ् ऊङ्भावोस्यामिति बहुव्रीहिः निपातनात्पञ्चम्याश्च

लुक षष्ठ्याश्चलुक तस्यप्रवृत्तिनिमित्तेयदङ्पुंस्कंतस्मात्परऊङभावोयत्रतथा

भूतंस्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरप
दे न तु पूरण्यां प्रियादौ च परतः गोस्त्रियोरिति ह्रस्वः चित्रा गावो यस्येति लौकिके
विग्रहे चित्रा अस् गो अस् इत्यलौकिके विग्रहे चित्रगुः रूपवद्भार्यः चित्रा जरत्यो
गावो यस्येति विग्रहे अनेकोक्तेर्बहूनां बहुव्रीहिः अत्र केचित् चित्रा जरती गौः ज
रतीचित्रगुर्वा एवं दीर्घतन्वीजङ्घः तन्वीदीर्घजंघः त्रिपदे बहुव्रीहौ प्रथमं न पुं
वत् उत्तरपदस्य मध्यमेन व्यवधानात् द्वितीयमपि न पुंवत् पूर्वपदत्वाभावात् उ

जरत्पदशब्दो हि समासस्य चरमावयवे रूढः पूर्वपदशब्दस्तु प्रथमावयवे इ-
ति वदन्ति वस्तुतस्तु नेह पूर्वपदमादिष्यते आनङ्‌ तद्गुणत्वयथा तेनोपान्त्य
सपूर्ववदेव विश्वाजरद्गुरित्यादि अत एव विश्वाजरन्योगानोयसेति द्वन्द्वगर्भेपि
विश्वाजरद्गुरिति भाष्यम् कर्मधारयपूर्वपदे तु द्वयोरपि पूर्ववत् जरद्विश्वगुः क
र्मधारयोत्तरपदे तु विश्वजरद्गवीकः स्त्रियाः किम् ग्रामणिकुलं दृष्टिरस्य ग्रा
मणिदृष्टिः भाषितपुंस्का किम् गङ्गाभार्यः अनङ्‌ किं वामोरूभार्यः समानाधि

करणेकिम् कल्याणमाता कल्याणीमाता स्त्रियांकिं कल्याणीप्रधानंयस्य
सकल्याणीप्रधानः पूरणंपांत अप्रपूरणीप्रमाण्योः पूरणार्थप्रत्ययान्तंयत्स्त्री॰
लिङ्गंतदन्तात्प्रमाण्यन्ताच्चबहुव्रीहेरप्स्यात् कल्याणीपञ्चमी यासांरात्री
णांताः कल्याणीपञ्चमारात्रयः स्त्रीप्रमाणीयस्यस्त्रीप्रमाणः ध्रुवङ्गावनि
षेधोप्युत्तरपदप्रधानपूरणामेवरात्रिःपूरणीवाच्याचेत्युक्तोदाहरणम्।
त्वाग्रमन्नत नञ्सुनञ्च नञ्दुत्तरपदादन्तोदात्तरपदाच्चबहुव्रीहेःकप्स्यात् पं

बह्वावः केऽणः केपरेऽणो ह्रस्वः स्यात् इति प्राप्ते न कपि कपिपरेऽणो ह्रस्वो न स्यात् क

ल्याणपञ्चमीकः पक्षः अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रि

रप्रधानम् बहुकर्तृकः अप्रियादिषु किं कल्याणीप्रियः प्रिया मनोज्ञा कल्या

णी सुभगा दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा

अबला तनया सामान्ये नपुंसकम् दृढं भक्तिर्यस्य स दृढभक्तिः स्त्रीत्वविवक्षा

यां दृढाभक्तिः तसिलादिष्वाकृत्वसुचः तसिलादिषु कृत्वसुजन्तेषु परेषु स्त्रि

सि॰
कौ॰
१८०

याःपुंवत्स्यात् परिगणनंकर्त्तव्यं सर्वाम्नतिव्याप्तिपरिहाराय त्रतमौतरप्तमपौ

चरड्जातीयरौ रूपप्पाशपौ कल्पदेशीयरौ थाल् तिल् थ्यनौ बह्वीष्व

ह्वत्र बह्वतः दर्शनीयतरा दर्शनीयतमाचरूप्येति वक्ष्यमाणो ह्रस्वः परत्वात्पुं

वद्भावं बाधते पट्वितरा पट्वितमा पटुचरी पटुजातीया दर्शनीयकल्पा दर्शनी

यदेशीया दर्शनीयरूपा दर्शनीयपाशा बहुथा शसाल्ला हूकी हूकतिः त्र

जाभ्योहिताः त्रजथ्या शालिबहुल्याः पार्श्वस्य पुंवद्भावो वक्तव्यः बह्वीभ्योदेहि बहुशः

अन्यथाः वचनतोर्गुणवचनस्य शुक्लायाभावः शुक्लता शुक्लत्वम् गुणवचन

स्यकिम् कर्म्मभावः कर्त्रीत्वं शारदः कृतार्थनेत्यादौ सामान्येन नपुंसकम् अस्माद्धे

तद्धिते हस्तिनीनां समूहः हास्तिकं अचो ढकिम् रौहिणेयः स्त्रीभ्यो ढगिति ढोत्र।

गृह्यते अग्नेर्ढगिति ढकि तत्पुंवद्भाव अग्नायी देवतास्य स्थालीपाकस्याग्नेयः सपत्नी

शाद्वस्त्रियामाद्यपर्यायात्सपत्नशाद्वाद्वाद्यर्द्धरवादित्वात् ङीन्येकः समानः पतिर्य

स्याः इति विग्रहे विवाहनिबन्धनं पतिशब्दमाश्रित्य स्त्रीलिङ्गो द्वितीयः स्वामिपर्या

सि॰
कौ॰
५८

यप्रतिषेधेन भावितपुंस्कत्तीयाः श्रायेयोः शिवाद्यण् सपत्न्याश्चपत्नं सापत्नाः तृती
यानलिङ्गविशिष्टपरिभाषयापत्नन्तरपदलक्षणोऽण्णेव ननणः शिवादेर्नूढयो
देवग्रहणात् सापत्नाः ठकक्षमोस्तु भवमाबाद्याभावत्काः भवदीयाः एतद्धा
तिक मेकान्तहितेवेतिसूत्रं च नकर्तव्यम् सर्वनाम्नो वृत्तिमात्रे इति भाष्यकारेष्टा
गतार्थत्वात् सर्वम [illegible] या सर्वकाम्यति सर्वकाभार्यायस्य सः सर्वक
भार्यः सर्वप्रियइत्यादि सर्वस्यैवेदम् भैसर्वाडेतिलिङ्गात् नेनाकचिप्रकर्षोऽह । ५८ ।

त्रैचन सर्विका सर्वाः कुक्कुट्यादीनामण्डादिषु कुक्कुट्याण्डं कुक्कुटाण्डम् मृ
ग्याःपदं मृगपदम् मृगक्षीरं काकशावः क्यङ्मानिनोश्च एतयोःपरतःपुंवा
त् एतायते एनीवाचरति श्येतायते स्वभिन्नौ कांचिद्दर्शनीयांमन्यते मादर्श
नीयमानिनी दर्शनीयां स्त्रियंमन्यते दर्शनीयमानीचैत्रः नकोपधायाः कोप
धायानपुंवत् पाचिकाभार्यः रसिकाभार्यः मद्रिकायते मद्रिकामानिनी को
पधप्रतिषेधेतद्धितवुग्रहणाक्षेहपाकाभार्यायस्यसपाकभार्यः संज्ञापूरण्योश्च॥

श्रुनयोर्नपुंवत् दत्ताभार्यः दत्तामानिनी दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभू-
तोऽयमिति भाषितपुंस्कत्वमिति पञ्चमीभार्यः पञ्चमीपाशा वृद्धिनिमित्तस्यत-
द्धितस्यारक्तविकारे वृद्धिशब्देनविहिताया वृद्धिस्तद्धेतुर्यस्तद्धितोरक्तविकारा-
र्थस्तदन्तास्त्रीनपुंवत् स्रौघ्नीभार्यः माथुरीयते माथुरीमानिनी वृद्धिनिमित्तस्यकि-
म् मध्यमभार्यः तद्धि[illegible]तस्यकिम् काण्डलावभार्यः वृद्धिशब्देनकिंतावज्जार्यः र-
क्तेतुकाषायीकन्यायस्यकाषायकन्यः विकारेतुहैमीमुद्रिकायस्यहैममुद्रिकः वृ

द्विगोर्लुगनपत्ये इति अणो लुकि ह्रस्वाभावादिह पुंवत् वैयाकरणभार्यः सौवश्वभार्यः

स्वाङ्गाच्चेतः स्वाङ्गाद्य ईकारस्तदन्ता या स्त्री न पुंवत् सुकेशीभार्यः स्वाङ्गात्किं पटुभा

सुकेशमानी

र्यः इतः किं सुकेशभार्यः अमानिनीति वक्तव्यम् सुकेशमानिनी जातेश्च जातेर्य

ीयः प्रत्ययस्तदन्तं न पुंवत् शूद्राभार्यः ब्राह्मणीभार्यः सौत्रस्यैवायं निषेधः तेन

हस्तिनीनां समूहो हास्तिकमित्यत्र भस्याढे इति भवत्येव संख्ययाव्ययासन्नाद

धिकसंख्याः संख्येये संख्यार्थया संख्यया अव्ययादयः समस्यन्ते स बहुव्री

सि॰
कौ॰
८३

ह्निःदशानांसमीपेयेसन्तितेउपदशाः नवएकादशवेत्यर्थः बहुव्रीहौसंख्येयेड
तिबहुसमाप्येडच् तिविंशतेर्डितिविंशतेर्भस्यतिशब्दस्यलोपःस्यात् डिति आसं
न्नविंशाः अदूरत्रिंशाः अधिकचत्वारिंशाः द्वौवात्रयोवाद्वित्राः द्विरावृत्तादशद्वि
दशाः विंशतिरित्यर्थः दिङ्नामान्यन्तराले दिशोर्नाम्नामन्तरालेवाच्येप्राग्वत्
दक्षिणस्याःपूर्वस्याश्चदिशोरन्तरालंदक्षिणपूर्वा नामग्रहणाद्यौगिकानांन ऐ
न्द्र्याश्चकौबेर्याश्चान्तरालं तत्रेतेनेदमितिसरूपे सप्तम्यन्तंग्रहणविषयेसरूपेपदे ८३

तृतीयान्तेनचप्रहरणविषयेइदंयुद्धमित्यर्थे समसेतेकर्मव्यतिहारेसबहुव्रीहिः इ

तिषाह्यादयंविषयविशेषोलभ्यते अन्येषामपिदृश्यते दीर्घइत्यनुवर्तते इच् कर्म

व्यतिहारेबहुव्रीहौपूर्वपदान्तस्यदीर्घःइच् समासान्तोवक्ष्यते तिष्ठद्गुप्रभृतिषि

च प्रत्ययस्यपाठादव्ययीभावादव्ययत्वंच केशाकेशिगृहीत्वाइदंयुद्धंप्रवृत्तं के

शाकेशि दंडैर्दंडैश्चप्रहृत्येदंप्रवृत्तंदंडादंडि मुष्टीमुष्टि ओर्गुणः उवर्णा

न्तस्यभस्यगुणःस्यात्तद्धिते अवादेशः बाहूबाहवि ओरोदितिवक्ष्यमाणेनक्रिः।।

संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं तेन स्वायम्भुवमिति सिद्धम् सह्वेपेकिं हलेन
मुसलेन तेन सहेति तुल्ययोगे तुल्ययोगे वर्तमानं सहेत्येतत्तृतीयान्तेन प्राग्वत्
वोपसर्जनस्य बहुव्रीह्यवयवस्य सहस्य सः स्यात् पुत्रेण सह सपुत्रः सहपुत्रो वा।
गतः तुल्ययोगवचनं प्रायिकम् सकर्मकः सलोमकः प्रकृत्याशिषि सहशब्दः
प्रकृत्या स्यादाशिषि स्वस्ति राज्ञे सहपुत्राय सहामात्याय अगोवत्सहलेष्विति वा।
च्यम् सगवे सवत्साय सहलाय बहुव्रीहौ संख्येये डजबहुगणात् संख्येये यो बहुव्री।

हिन्तस्मात्तुचस्मात् उपदशाः अबहुगणात्किं उपबहवः उपगणाः अत्रसंख्येयविशे

षः संख्यायामव्ययासन्नरूपसमवाच्यः अपिकलोपादमत्रनिर्गतानित्रिंशतोनिस्त्रिंशानि

वर्षाणिचैत्रस्य निर्गतस्त्रिंशतोऽङ्गुलिभ्योनिस्त्रिंशःखड्गः बहुव्रीहौसक्थ्यक्ष्णोः

स्वाङ्गात्षच् स्वाङ्गेयेनषष्ठीस्वाङ्गवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेःषच्स्यात् दीर्घसक्थि

नीयसमदीर्घे सक्थ्यः जलजाक्षी स्वाङ्गात्किम् दीर्घसक्थिशकटम् स्थूलाक्षा

वेणुयष्टिः अक्ष्णोदर्शनादितिषच् अङ्गुलेर्दारुणि अङ्गुल्यन्ताद्बहुव्रीहेःषच् स्यात्

सि॰
कौ॰
८५

हृतपर्थे पञ्चाङ्गुलयोयस्य तत्पञ्चाङ्गुलम् दारुअङ्गुलिसदृशावयवं धान्यादिविक्षेप

काष्ठमुच्यते बहुव्रीहेः किं द्वेअङ्गुलीप्रमाणमस्य द्व्यङ्गुलायष्टिः मद्वितार्थेतिनतत्पुरु

षे तत्पुरुषस्याङ्गुलेरित्यच् दारुणिकिं पञ्चाङ्गुलिर्हस्तः द्वित्रिभ्यांषःमूर्ध्नः द्वाभ्यां

मूर्ध्नः षःस्याद्बहुव्रीहौ द्विमूर्धः त्रिमूर्धः नेतुर्नक्षत्रेअप् वक्तव्यः नक्षत्रेयोनेतृणा

हः ततः मृगोनेतायासांरात्रीणांतामृगनेत्रारात्रयः पुष्यनेत्राः अन्तर्बहिर्भ्यांचलो

म्नः आभ्यांलोम्नअप्स्यात् बहुव्रीहौ अन्तर्लोमः बहिर्लोमः अप्रन्तामिकायाःसंज्ञा।

८५

येनसंचास्थलात् नासिकान्ताद्दह्रुवीहेरचस्मात् नासिकापाहस्तनसंप्राप्नोति न

तस्थलपूर्वात् पूर्वपदात्संज्ञायामगः पूर्वपदस्थान्निमित्तात्परस्यनस्यणःस्यात् सं

ज्ञायांनतुगकारव्यवधाने दुरिवनासिका प्रथमस्तुणमः खरणसः अगः किम् ऋ

चामयनं ऋगयनं अगएगयनादिभ्य इतिनिपातनात्स्वाभावमात्रिमागइतिप्रत्या

ख्यातं भाष्ये अस्थलात्किंस्थलनासिकः खुराखराभ्यांवानस् खुरणाःखरणाः प

देतुपिदृश्यते खुरणसः (खरणसः) उपसर्गाच्च प्रादेर्योनासिकापाहस्तदन्ताद्दह्रुवीहेरच् ना

सि॰
कौ॰
८९

सिकाया नसादेशश्च असंज्ञार्थं वचनम् उन्नता नासिका यस्य उन्नसः उपसर्गादनोत्प-
र इति निषेधम् तद्बाध्य भाष्यकारस्त्वाह उपसर्गाद्बहुलम् उपसर्गस्थान्निमित्तात्प-
रस्य नसो नस्य णः स्याद्बहुलम् प्रणसः वेर्ग्रो वक्तव्यः विगता नासिका यस्य (वि)ग्रः ख्य वि॰
श्चैव विग्रः विख्यः ख्यश्च विख्यः कथं तर्हि विनसा हतबान्धवेति भट्टिः विगतया ना-
सिकयोपलक्षितेति व्याख्येयम् सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदा-
जपदप्रोष्ठपदाः ॥ एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते शोभनं प्रातरस्य सुप्रा- ८९

ताः क्षोभनं क्षोभसमक्षाः क्षोभनं दिवा समदिवाः शारेरिवक्रालिरस [illegible]

[illegible] शारिकुदाः वनस्तो श्रयोस्मवनरश्रः पापाइवपादोयसपणीपद। श्रजपदाः।

प्रोष्ठोगौसलेसवपादोयसप्रोष्ठपदः नक्षत्राः सम्भ्योहलिमक्षोरसनरस्याम् अ

चस्यात् अश्लः अहलिः अ सक्यः अमक्रियः एवंडाः सुम्भ्यांपाक्योतिनिपादान्नरस्मा॥

अपाकाः अपाकिः निसमसिक्षुज्ञामेपयोः नक्षत्राः सम्भइत्येव अप्रज्ञाः इक्षुज्ञाः।

सप्रज्ञाः अप्रमथाः इमेमथाः समेमथाः धर्मोदनिर्केवलात् केवलास्मर्तपदाभ्योयोथ

मेधाह्लदन्ताद्बहुव्रीहेरनिच्स्यात् कल्याणधर्मा केवलात्किं परमः स्वो धर्मो यस्मे
ति त्रिपदविग्रहे बहुव्रीहौ मा भूत् स्वपाह्यो ह्यी हन एवं पदं किन्तु मध्यमवादोपदि
कम् सन्दिग्धमाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः एवं तु परमस्वधर्मेत्य
पि स्याधेव निरुन्नियमोऽश्रन्नच्छिन्नियधर्मेत्यादिवत् पूर्वपदं तु बहुव्रीहिणा निष्पते
जम्भासुहरिततृणसोमेभ्यः जम्भेति कृतसमासान्तं निपात्यते जम्भो भक्ष्ये दन्ते चाशो
भनो जम्भो यस्य सुजम्भा हरितजम्भा तृणं भक्ष्यं यस्य तृणमिव दन्ता यस्येति वा तृण॰

जम्भा एवं सोमजम्भा स्वादिभ्यः किम् पतितजम्भः दक्षिणेर्मा लुब्धयोगे दक्षिणे ई
र्मं व्रणं यस्य सः दक्षिणेर्मा मृगः व्याधेन कृतव्रण इत्यर्थः इच् कर्मव्यतिहारे कर्मव्यति
हारे यो बहुव्रीहिस्तस्मादिच् स्यात् समासान्तः केशाकेशि मुसलामुसलि द्विदण्डा
दिभ्यश्च तादर्थ्ये चतुर्थ्येषा एषां सिद्ध्यर्थमिच् प्रत्ययः स्यात् द्वौ दण्डौ यस्मिन् प्रहरणे तत्
द्विदण्डि द्विमुसलि उभाहस्ति उभयाहस्ति प्रसंभ्यां जानुनोर्ज्ञुः आभ्यां परयोर्जानुश
ब्दयोर्ज्ञुरादेशः स्यात् बहुव्रीहौ प्रगते जानुनी यस्य सः प्रज्ञुः संज्ञुः ऊर्ध्वाद्विभाषा ऊर्ध्वे

ज्ञुः ऊर्ध्वजानुः धनुषश्च धन्वन्तस्य बहुव्रीहेरनङादेशः स्यात् शार्ङ्गधन्वा वा संज्ञाया
म् शतधन्वा शतधनुः जायाया निङ् जायान्तस्य बहुव्रीहेर्निङादेशः स्यात् लोपो व्यो
र्वलि वकारयकारयोर्लोपः स्यात् वलि युवतिर्जाया यस्य युवजानिः गन्ध
स्येदुत्पूतिसुसुरभिभ्यः एभ्यो गन्धस्य इकारोऽन्तादेशः स्यात् उद्गन्धिः पूतिगन्धिः सुग
न्धिः सुरभिगन्धिः गन्धस्येत्वे तदेकान्तग्रहणं एकान्तमेकदेश एव अविभागेन लक्ष्यमा
णइत्यर्थः सुगन्धि पुष्पं सलिलं च सुगन्धिर्वायुः नेह शोभना गन्धा द्रव्याण्यस्य सुगन्धः

श्रापणिकः अल्पाख्यायाम् सूपस्य गन्धो लेशो यस्मिंस्तत् सूपगन्धि भोजनम् घृतग-
न्धि गन्धो गन्धक आमोदे लेशे समवाये गर्वे योरिति विश्वः उपमानाच्च पद्मस्येव गन्धो
यस्य पद्मगन्धि पादस्य लोपो ऽहस्त्यादिभ्यः हस्त्यादिवर्जितादुपमानात्परस्य पादश-
ब्दस्य लोपः स्याद्बहुव्रीहौ स्थानिद्वारेणायं समासान्तः व्याघ्रस्येव पादावस्य व्याघ्रपात्
अहस्त्यादिभ्यः किम् हस्तिपादः कुसूलपादः कुम्भपदीषु च कुम्भपद्यादिषु पादस्य
लोपो ङीश्च निपात्यते स्त्रियां पादः पत् कुम्भपदी स्त्रियां किं कुम्भपादः संख्यासुपूर्वस्य

ॐ
सि.कौ
१८५

पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ द्विपात् त्रिपात् वयसि दन्तस्य दतृ संख्यासुपूर्व
स्य दन्तस्य दतृ इत्यादेशः स्याद्वयसि द्विदन् त्रिदन् चतुर्दन् षड्दन्ता अस्य षोडन्
सुदन् सुदती वयसि किं द्विदन्तः करी सुदन्तः स्त्रियां संज्ञायाम् दन्तस्य दतृ स्यात्
समासान्तो बहुव्रीहौ अयोदती फलदती संज्ञायां किं समदन्ती विभाषा श्यावारो
काभ्याम् दन्तस्य दतृ बहुव्रीहौ श्यावदन् श्यावदन्तः अरोकदन् अरोकदन्तः॥
अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च एभ्यो दन्तस्य दतृ वा कुड्मलाग्रदन् कुड्मलाग्रद

१८५

न्तः ककुदस्यावस्थायांलोपः अजातककुत् पूर्णककुत् त्रिककुत्पर्वते त्रीणिक

कुदान्यस्य त्रिककुत् संज्ञैषा पर्वतविशेषस्य त्रिककुदोन्यः उद्विभ्यां काकुदस्य लो

पः उत्काकुत् विकाकुत् काकुदं तालु पूर्णाद्विभाषा पूर्णकाकुत् पूर्णकाकुदः ।

सुहृद्दुर्हृदौ मित्रामित्रयोः सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते सुहृन्मित्रं दुर्हृदमि

त्रः अन्यत्र सुहृदयः दुर्हृदयः उरःप्रभृतिभ्यः कप् व्यूढोरस्कः प्रियसर्पिष्कः पु

म्पुमान् अनड्वान् पयः नौः लक्ष्मीरिति एकवचनान्तानि पठ्यन्ते द्विवचनबहु

सि॰
कौ॰
१५०

वचनान्तेभ्यः शेषाद्विभाषेति विकल्पेन कप् द्विपुमान् द्विपुंस्कः अर्थान्नञः अनर्थ
कं नञः किं अपार्थं अपार्थकम् इनः स्त्रियाम् बहुदण्डिका नगरी अनिनस्मन्ग्रह
णान्यर्थवतानर्थकेन च तदन्तविधिं प्रयोजयन्ति बहुवाग्मिकाः स्त्रियां किम् बहु
दण्डी बहुदण्डिको ग्रामः शेषाद्विभाषा अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहु
व्रीहेः कप्वा स्यात् महायशस्कः महायशाः अनुक्तेत्यादि किं व्याघ्रपात् सुगन्धिः
प्रियपथः शेषाधिकारस्था किम् उपबहवः उत्तरपूर्वा सप्तघ्नः तन्त्रादिना शेषषा। १५०

होर्थेदयपरः आपोऽन्यतरस्यां कपि आबन्तस्य ह्रस्वो वा स्यात् बहुमालाकः बहुमा

लकः कबभावे बहुमालः नसंज्ञायाम् शेषाद्विभाषा कप् न स्यात् संज्ञायां वि

श्वेदेवा यस्य विश्वेदेवः ईयसश्च ईयसन्तोत्तरपदान्न कप् बहवः श्रेयांसो ऽस्य स ब

हुश्रेयान् गोस्त्रियोरिति ह्रस्वप्राप्ते ईयसो बहुव्रीहौ नेति वाच्यम् बह्व्यः श्रेयस्यो यस्य स ब

हुश्रेयसीः बहुव्रीहिः किम् अतिश्रेयसिः वन्दितभ्रातः पूजितेर्थे यो भ्रातृशब्दस्तद

न्तान्न कप् स्यात् प्रशस्तो भ्राता यस्य स प्रभ्राता नदृजनादिति निषेधस्तु बहुव्रीहौ सक

सि
कौ

मत्वेणारिम्यतः प्रागेवेति वदन्ते वदितेकिं मूर्विभ्रान्तकः नाडीतन्त्र्योः स्वाङ्गे स्वाङ्गेयो।
नाडीतन्त्रीशब्दान्तदन्नात्कप् न स्यात् बहुनाडिःकायः बहुतन्त्रीर्ग्रीवा तन्त्रीधमनी
स्त्रीप्रत्ययान्तत्वाभावात् ह्रस्वो न स्वाङ्गे किम् बहुनाडीकः स्तम्भः बहुतन्त्रीकावी
णा निष्प्रवाणिश्च कबभावोऽत्र निपात्यते प्रपूर्वाद्वयतेर्ल्युट् प्रवाणी तन्तुवायश
लाका निर्गता प्रवाणी अस्मान्निष्प्रवाणिः पटः समासान्तः नञ्दुःसुभ्यः सप्तमी
विशेषणे बहुव्रीहौ सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् कण्ठेकालः ॥१॥

नपवत्तापकाद्यधिकरणपदो बहुव्रीहिः चित्रगुः सर्वनामसंख्ययोरुपसंख्यान

म् सर्वश्वेतः द्विशुक्लः मिथोनयोः समासे संख्यायाः पूर्वं शब्दपरविप्रतिषेधात् द्व्यन्यः

संख्याया अल्पीयस्याः गडुप्रियः प्रियगडुः गड्वादेः परा सप्तमी गडुकण्ठः क्वचिन्न व

हेगडुः निष्ठा निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् कृतकृत्यः जातिकालसुखादिभ्यः प

रा निष्ठा वाच्या सारङ्गजग्धी मासजाता सुखजाता प्रायिकं चेदम् कृतकटः पी

तोदकः वाहिताग्न्यादिषु आहिताग्निः अग्न्याहितः आकृतिगणोऽयम् प्रहरण

सि॰
कौ॰
१९२

र्थेभ्यः परेनिष्ठासप्तम्यौ भवतः दण्डपाणिः विहतासिः इतिबहुव्रीहिः चा

र्थेद्वन्द्वः अनेकंसुबन्तंचार्थेवर्तमानंवासमस्यते सद्वन्द्वः समुच्चयान्वाचयेत

रेतरयोगसमाहाराश्चार्थाः परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समु

च्चयः अन्यतरस्यानुषङ्गिकत्वेनान्वाचयः मिलितानामन्वयइतरेतरयोगः समू

हःसमाहारः तत्रेश्वरंगुरुंचभजस्वेतिसमुच्चये भिक्षामटगांचानयेत्यन्वाचये

चनसमासोऽसामर्थ्यात् धवखदिरौसंज्ञापरिभाषम् अनेकोक्तेर्होतृपोतृ

१९२

नेष्टोद्गातारः द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे होतापोतानेष्टोद्गातारः राजद
न्तादिषु परम् एषु पूर्वप्रयोगार्हं परं स्यात् दन्तानां राजा राजदन्तः धर्मादिषु
नियमः अर्थधर्मौ धर्मार्थौ जम्पती दम्पती जायापती जायाशब्दस्य जम्भावो
दम्भावश्च वा निपात्यते आकृतिगणोऽयम् द्वन्द्वे घि द्वंद्वे घिसंज्ञं पूर्वं स्यात् हरि
श्च हरश्च हरिहरौ अनेकप्राप्तावेकत्र नियमो नियमः शेषे हरिगुरुहराः हरिह
रगुरवः अजाद्यदन्तम् द्वंद्वे पूर्वं स्यात् ईशकृष्णौ बहुष्वनियमः अश्वरथे

सि॰
कौ॰
१९६

द्राः इन्द्राश्वरथाः अजाद्यदन्तं विप्रतिषेधेन इन्द्राग्नी अल्पाच्तरम् शिवके
शवौ ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण हेमन्तशिशिरवसन्ताः कृत्तिका
रोहिण्यौ समाक्षराणां किं ग्रीष्मवसन्तौ लघ्वक्षरं पूर्वम् कुशकाशम् अभ्यर्हि
तं च तापसपर्वतौ वर्णानामानुपूर्व्येण ब्राह्मणक्षत्रियविट्शूद्राः भ्रातुर्ज्यायसः
युधिष्ठिरार्जुनौ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् एषां द्वन्द्व एकवत्स्यात् पाणि।
पादं मार्दङ्गिकपाणविकम् रथिकाश्वारोहम् समाहारस्यैकत्वादेकत्वे सिद्धे नि

१९६

यमार्थं प्रकरणम् प्राण्यङ्गादीनांसमाहारएकवद्यथास्यात् अनुवादेचरणानाम्

चरणानांद्वन्द्वएकवद्भवतिसिद्धस्योपन्यासे स्थेणोर्लुङीतिवाच्यम् उदगात्कठकाला

पम् प्रत्यष्ठात्कठकौथुमम् अध्वर्युक्रतुरनपुंसकम् यजुर्वेदेविहितोयः क्रतु

स्तद्वाचिनामनपुंसकलिंगानाम् द्वन्द्वएकवत्स्यात् अर्काश्वमेधं अध्वर्युक्रतुः॥

किम् इषुवज्रोसामवेदेविहितो अनपुंसकंकिम् राजसूयवाजपेयौ अर्धर्चा

दी अध्ययनतोविप्रकृष्टाख्यानाम् अध्ययनेनप्रत्यासन्नाख्यायेषांतेषांद्वन्द्व

सि॰
कौ॰
१५४

द्वन्द्व एकवत् पदकक्रमकम् जातिरप्राणिनाम् प्राणिवर्ज्जजातिवाचिनां द्वन्द्व ए-
कवत् धानाशष्कुलि प्राणिनां तु विट्शूद्राः द्रव्यजातीनामेव नेह रूपरसौ ग-
मनाकुञ्चने जातिप्राधान्य एवायमेकवद्भावः द्रव्यविशेषविवक्षायां तु बदरा-
मलकानि विशिष्टलिङ्गो नदीदेशोऽग्रामाः ग्रामवर्ज्जनदीदेशवाचिनां
भिन्नलिङ्गानां समाहारे द्वन्द्व एकवत्स्यात् उद्ध्यश्चेरावती च उद्ध्येरावति गङ्गा
च शोणश्च गङ्गाशोणम् कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् भिन्नलिङ्गानां किम् ॥४॥

गङ्गायमुने मद्रकेकयाः अग्रामाः किम् जाम्बवं नगरं शालूकिनी ग्रामः जाम्ब
वशालूकिनि क्षुद्रजन्तवः एषां समाहारे द्वन्द्वः एकवत्स्यात् यूकालिक्षम् ग्रा
नकुलात्क्षुद्रजन्तवः येषां च विरोधः शाश्वतिकः एषां च प्राग्वत् अहिनकुलम्
गोव्याघ्रम् काकोलूकमित्यादौ परत्वात् विभाषा वृक्षमृगेति प्राप्ते चकारेण बा
ध्यते शूद्राणामनिरवसितानाम् अबहिष्कृतानां शूद्राणां प्राग्वत् तक्षायस्का
रम् पात्राद्बहिष्कृतानाम् चण्डालमृतपाः गवाश्वप्रभृतीनि च यथोच्चा॥

गितानिमित्तत्वनि गवाश्वं दासीदासमित्यादि विभाषावृक्षमृगतृणधान्यव्यञ्जनप
शुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् वृक्षादीनां सप्तानां द्वन्द्वः अश्ववडवेत्या
दिद्वन्द्वत्रयं च वा प्राग्वत् वृक्षादौ विशेषाणामेव ग्रहणम् प्लक्षन्यग्रोधम् प्लक्षन्
यग्रोधाः रुरुपृषतम् रुरुपृषताः कुशकाशम् कुशकाशाः व्रीहियवम् व्रीहि
यवाः दधिघृतं दधिघृते गोमहिषम् गोमहिषाः शुकबकं शुकबकाः अश्वव
डवं अश्ववडवौ पूर्वापरं पूर्वापरे अधरोत्तरम् अधरोत्तरे फलसेनावनस्पतिमृग

शकुनिष्वदृजन्त्वथामनुष्याणां बहुप्रकृतिरेवद्वंद्व एकवदिति वाच्यम् बदराणि

चामलकानि च बदरामलकम् जातिरप्राणिनामिति एकवद्भावो नेह बदरामल

के रथिकाश्वारोहौ प्लक्षन्यग्रोधौ इत्यादि विभाषा वृक्षेति सूत्रे ये प्राणिनस्तेषां ग्रहणा

म् जातिरप्राणिनामिति निषेधे विकल्पार्थम् पशुग्रहणं हस्त्यश्वादिषु सेनाङ्ग

त्वान्निषेधे मृगाणां मृगैरेव शकुनीनां शकुनिभिरेव उभयत्रायं द्वन्द्वः अश्ववडवसहेतरे

तरयोग एवेति नियमार्थं मृगशकुनिग्रहणम् पूर्वापरमधरोत्तरमित्य

सि॰
कौ॰
१५८

पि अश्ववडवग्रहणं नपुंसकार्थं अन्यथा परत्वात् पूर्ववदश्ववडवाविति स्यात् वि

प्रतिषिद्धं चानधिकरणवाचि विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवत्स्या

त् वैकल्पिकः समाहारद्वन्द्वस्यार्थ इति सूत्रेण प्राप्तः स विरुद्धार्थानां यदि भवति

तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदम् तेन द्रव्यवाचिनामितरेतरयोग एव

शीतोष्णे उदके स्तः विप्रतिषिद्धं किम् नन्दकपञ्चजन्यम् इहपाक्षिकः समाहा

रद्वन्द्वो भवत्येव न दधिपयआदीनि एतानि नैकवत्स्युः दधिपयसी इत्यादि

षी निपातनात् दीर्घः ऋक्सामे वाङ्मनसी अधिकरणैतावत्त्वे च द्वन्द्वसंख्यावा

नैकवद्भावेति नियमोनस्मात् दश दन्तोष्ठाः विभाषा समीपे अधिकरणैताव

त्त्वस्य सामीप्येन परिच्छेदे समाहारएवेत्येवंरूपोनियमोवास्मात् उपदशं दन्तो

ष्ठाः आनङृतोद्वन्द्वे विद्यायोनिसंबन्धवाचिनामृदन्तानां द्वन्द्वे आनङ् स्यात् उत्त

रपदेपरे होतापोतारौ होतृपोतृनेष्टोद्गातारः मातापितरौ पुत्रेऽन्यतरस्यामि

स्तेनामणङ्कस्तुन्यापुत्रेङ्मन्वद्वन्द्वेः पितापुत्रौ देवताद्वन्द्वे च इहोत्तरपदेपरे आ

सि॰
कौ॰
११७

नङ्क्॰ मित्रावरुणौ वायुशाह्वयोगेप्रतिषेधः अग्निवायु वायुग्रीणनर्हेन्द्रग्रहणांप्रति
हमाहवर्यपरिग्रहार्थेनेनब्रह्मप्रजापती इमादौ नानङ्क्॰ एतद्विनेकहविर्भोगि
वेनस्तुतम् नापितो केशमिहमाहवर्यम् ईदश्रेसोमवरुणयोः देवताद्वन्द्वेइत्ये
व अग्नेः परेषामेषांमस्यः स्यात्मासे अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नीव
रुणौ इद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यात् देवताद्वन्द्वे अग्निमरुतौ देव
ताअस्य आग्निमारुतंकर्म अग्निवरुणौ देवतास्य आग्निवारुणं देवताद्वन्द्वेचेत्यभ ११७

यपदवृद्धिः अलौकिकेवाक्ये वानडमीबंवबाधित्वा शाहद्वेकिं अष्ट्रद्वेनेद्व

स्यपरस्मेत्सत्तरपदवृद्धिप्रतिषेधः दिवोन आग्रावैस्यवम् दिवोद्यावा देवताद्व

न्द्वेउत्तरपदे द्यावाभूमी द्यावाक्षमे दिवसश्चपृथिव्यां दिवइत्येवचात् द्यावा आ

देशाकारोच्चारणंमकारस्यरूतंमाभूत् इत्येतदर्थम् द्यौश्चपृथिवीच दिवस्पृथि

व्यौ द्यावापृथिव्यौ छन्दसिदृष्टानुविधिः द्यावाचिदस्मैपृथिवी दिवस्पृथिव्योरि

सत्रपदकारासविसर्गंपठन्ति उषासोषसः उषस् पात्रसोषासादेशः स्यादेवता

सि॰
कौ॰
१६८

द्वन्द्वेङघामास्त्र्यर्यम्। मातरपितरावुदीचाम्। उदीचां किम्। मातापितरौ। द्वन्द्वाच्चुदा-
षहान्तात्समाहारे। चवर्गान्ताद्दषहान्ताच्च द्वन्द्वाट्टच् स्यात्समाहारे। वाक्त्वचं। त्वक्स्र-
जं। शमीदृषदम्। वाक्त्विषम्। छत्रोपानहम्। समाहारे किम्। प्रावृट्शरदौ। इति।
द्वन्द्वः॥ सरूपाणामेकशेष एकविभक्तौ। रामौ रामाः। विरूपाणामपि
समानार्थानाम्। वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ। वृद्धो यूना
तल्लक्षणश्चेदेव विशेषः। एतासहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं। १६८

वेनयोः कृत्वैकशेषं स्यात् गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ वृद्धः किम् गर्गगार्ग्याय
णौ यूनाकिम् गार्ग्यगर्गौ तल्लक्षणः किम् भागवित्तिभागवित्तिकौ कुत्स्नंकिम्
गार्ग्यवात्स्यायनौ स्त्रीपुंवच्च एतावमहोक्तौ वृद्धास्त्री शिष्यते तदर्थश्च पुंवत् गार्गी
च गार्ग्यायणश्च गार्ग्यौ स्त्रियामित्यनुवर्तते यञञोऽश्च तिल्लक् दाक्षी च दाक्षा
यणश्च दाक्षी पुमान्स्त्रिया स्त्रियासहोक्तौ पुमान् शिष्यते तल्लक्षणश्चेद्विशेष
श्चेत् हंसी च हंसश्च हंसौ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् भ्राता च स्वसा च भ्रातरौ १

सि० कौ० ।५५

श्चदुहिताचपुत्रौ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् अक्लीबेनसहो
क्तौक्लीबंशिष्यते तच्चवाएकवत्स्यात् तल्लक्षणएवविशेषश्चेत् शुक्लःपटःशु
क्लाशाटी शुक्लंवस्त्रं तदिदंशुक्लं तानीमानिशुक्लानि पितामात्रा मात्रासहोक्तौ
पितावाशिष्यते माताचपिताचपितरौ मातापितरौ श्वशुरःश्वश्र्वा श्वश्र्वासहोक्तौश्व
शुरोवाशिष्यते श्वशुरौश्वश्रूश्वशुरौ त्यदादीनिसर्वैर्नित्यम् सर्वैःसहोक्तौत्यदादी
निनित्यंशिष्यन्ते सचदेवदत्तश्चतौ त्यदादीनांमिथः सहोक्तौयत्परंतच्छिष्यते ।५५

सचयश्चयौ सर्वविशेषस्यदृष्टत्वेनेतिभाष्यम् सचयश्चतौ त्यदादितः शेषेपुंनपुंस-

कतोलिंगवचनानि त्यदादीनांशेषेमध्येविवक्षितेशेषःप्रमान् यश्चनपुंसकं त

द्द्वयोर्नलिङ्गप्रतिपादकानिभवन्ति साचदेवदत्तश्चतौ तच्चदेवदत्ताचयज्ञदत्ता

श्चतानिपुंनपुंसकयोस्तत्परत्वान्नपुंसकंशिष्यते तच्चदेवदत्तश्चते अहन्त्वञ्चस

विशेषणानामितिवाच्यम् कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौतच्चसाच-

अर्थपिण्डौते ग्राम्यपशुसङ्घेष्वतरुणेषुस्त्री पशुसङ्घविवक्षायांस्त्रीशिष्यते पुमा

सि.
कौ.
३०

न्त्रियेत्यस्यापवादः गावइमाः ग्राम्येतिकिम् रुरवइमे पशुषुकिम् ब्राह्मणाःसंघेषु
किम् एतौगावौ चरतःअतरुणेषुकिम् वत्साइमे अनेकशफेष्वितिवाच्यम् अश्वाइमे इ
इसर्वत्रएकशेषकृते अनेकाभावाद्द्वन्द्वोन नेनपितरमीपितरांमीस्यादौसममास
सेत्यन्नोदानाःशाणपङ्क्तादेकट्ठावश्चन पस्यानैपस्यानरस्यादौसमासान्नोनर
सेकशेषः कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः परार्थाभिधाय   भिधानंवृत्तिः इत्यर्थः
केवाक्यंविग्रहः सद्विधाः लौकिकोलौकिकश्चपरिनिष्ठितत्वात्साधुर्लौकिकः अ   ३०

योगान्नैषां साधुत्वमलौकिकः यथा राज्ञः पुरुषः राजन् ङस् पुरुष सु इति स्वविग्रहेति

त्समासे स्वपदविग्रहैर्वा समासस्य तत्त्वैर्निश्चयो वादः अव्ययीभावतत्पुरुषबहुव्री

हिद्वन्द्वाधिकारबहिर्भूतानामपि समस्तपेतिविधानात् पूर्वपदार्थप्रधानोऽव्ययी।

भावः उत्तरपदार्थप्रधानस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्र

धानो द्वन्द्व इत्यपि प्रावीप्रवादः प्रायोभिप्रायः सूपप्रति उन्मत्तगङ्गमित्यादावव्ययी

भावे अतिमालेत्यादौ तत्पुरुषे द्वित्रा इत्यादौ बहुव्रीहौ दन्तोष्ठमित्यादि द्वन्द्वे चाभा

सि।
कौ।
२१

वा तत्पुरुषविशेषः कर्म्मधारयः तद्विशेषो द्विगुः अनेकपदं द्वन्द्वबहुव्रीही येव

तत्पुरुषसङ्कविदेवसङ्कम् किंच सुपां सुपा तिङ्गा नाम्ना धातुनाथ तिङ्गं तिङ्गा।

सुबन्तेनेति वक्तव्यः समासः षड्विधो बुधैः सुपा राजपूरुषः तिङ्गा पर्य्यभूषयत् ना

म्नाकुम्भकारः धातुना कटप्रूः अजस्रं तिङ्गं तिङ्गा पिवतावादता तिङ्गं सुपा ह्यु।

न विवदते णेनियमं क्रियायां मा कृन्त विवदाणा पद्दीशादयो न पदार्थे इति स

र्वं सकौटापातान्तसमासः इति सर्वसमासविशेषः सकारस्य पथा मनते। २५

समासस्य

अ अनक्षे इति छेदः ऋगाद्यन्तसमस्य अप्रत्ययोऽन्तावयवस्स्यात् अक्षे या धूस्तदन्तस्य न

न अर्धर्चः अनृचबह्वृचावध्येतर्येव नेह अनृक्साम बह्वृक्सूक्तम् विष्णोः पूर्वि

ष्णुपुरम् क्लीवत्वं लोकात् विमलापं सरः द्व्यन्तरुपसर्गेभ्योऽप ईत् अप इति कृतस

मासान्तस्यानुकरणम् षष्ठ्यर्थे प्रथमा पञ्चम्याः परस्याप ईत्स्यात् द्विर्गता आपो य

स्मिन्निति द्वीपम् अन्तरीपं प्रतीपं समीपं समापो देवयजनमिति न समस्ता आपो य

स्मिन्निति वाक्यम् कृतसमासान्तग्रहणान्नेह स्वप् स्वपौ अवर्णान्ताद्वा प्रेपं परेपम् प्रापं परापम्

ऊदनोर्देशे अनोःपरस्यअपऊत्स्यात् देशे अनूपोदेशः राजधुरा अक्षेतु अक्षधूः दृ
ढधूरक्षः सखिपथोरम्यपथोदेशः अच्प्रत्यन्ववपूर्वात्सामलोम्नः एतत्पूर्वात्सामलो
म्नान्तात्समासादच्स्यात् प्रतिसामं अनुसामम् प्रतिलोमम् अनुलोमम् अवलो
मम् कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते कृष्णभूमः उदग्भूमः पाण्डुभूमः
द्विभूमः त्रिभूमः प्रासादः संख्यायानदीगोदावरीभ्यांच पञ्चनदम् सप्तगोदाव
रम् अजितियोगविभागादन्यत्रापिपद्मनाभः अत्सोदर्शनात् अवत्वाःपर्यायादः

तिशाद्दादच् स्यात्समासान्तः गवामतिरवगवातः अचतुरविचतुरसुचतुरस्त्री
पुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तन्दिवरा
त्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमा
होक्षवृद्धोक्षोपशुनगोष्ठश्वाः एते पञ्चविंशतिरजन्ता निपात्यन्ते आद्यास्त्रयो बहु
व्रीहयः अविद्यमानानि चत्वारि येषाम् अचतुरः विचतुरः सुचतुरः त्र्युपाभ्यां चतुरोऽजि
ष्यते त्रिचतुराः चतुर्णां समीपे उपचतुराः ततएकादशद्वन्द्वाः स्त्रीपुंसौ धेन्वनडुह

म् ऋक्सामे वाङ्मनसे अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् दाराश्च गावश्च दारगवम् ऊ
रू चाष्ठीवन्तौ च ऊर्वष्ठीवम् निपातनाट्टिलोपः पदष्ठीवम् निपातनात्पादशब्दस्य
पद्भावः नक्तं च दिवा च नक्तंदिवम् रात्रौ च दिवा च रात्रिंदिवम् रात्रेर्मान्तत्वं निपा
त्यते अहनि च दिवा च अहर्दिवम् वीप्सायां द्वन्द्वो निपात्यते अहन्यहनीत्यर्थः स
रजसमिति साकल्येऽव्ययीभावः बहुव्रीहौ तु अरजः पङ्कजम् निश्चितं श्रेयः निः
श्रेयसम् तत्पुरुष एवेह निःश्रेयस्कः पुरुषः पुरुषस्यायुः पुरुषायुषं ततो द्विगुः।

द्व्यायुषं त्र्यायुषम् ततो द्वन्द्वः ऋग्यजुषम् ततस्त्रयः कर्मधारयाः जातोक्षः महो
क्षः वृद्धोक्षः शुनः समीपम् उपशुनम् टिलोपाभावः संप्रसारणं च निपात्यते गोष्ठे
श्वाः गोष्ठश्वाः ब्रह्महस्तिभ्यां वर्चसः अच् स्यात् ब्रह्मवर्चसं हस्तिवर्चसम् पल्यरा
जभ्यां चेति वक्तव्यम् पल्यवर्चसम् राजवर्चसम् अवसमन्धेभ्यस्तमसः अवतम
सम् सन्तमसम् अन्धयत्यन्धं पचाद्यच् अन्धं तमः अन्धतमसम् श्वसोवसीयः
श्रेयसः वसुशब्दः प्रशस्तवाची तत ईयसुन्निवसीयाः श्वस् शब्द उत्तरपदार्थप्रशं

सि॰
कौ॰
२०४

सामाशीर्विवक्षितामाह मयूरव्यंसकादित्वात्समासः श्वोवसीयसम् श्वःश्रेयसं ते भू
यात् अन्ववतप्ताद्रहसः अनुरहसम् अवरहसम् तप्तरहसम् प्रतेरुरसः सप्तमी
स्थात् उरसि प्रत्युरसम् विभक्त्यर्थेऽव्ययीभावः अनुगवमायामे एतन्निपात्यते
दीर्घत्वे अनुगवं यानं अस्य चायाम इति समासः द्विस्तावा त्रिस्तावा वेदिः अच् प्र
त्ययः टिलोपः समासश्च निपात्यते यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा
वा अश्वमेधादौ तत्रेदं निपातनम् वेदिरिति किम् द्विस्तावती त्रिस्तावती रज्जुः॥ २०४

उपसर्गादध्वनः प्रगतोध्वानं प्राध्वो रथः। न पूजनात् पूजनार्थेभ्यः समासान्ता।
न स्युः सुराजा अतिराजा स्वतिभ्यामेव नेह परमराजः पूजनात्किम् ग्राममतिक्रान्तः
अतिगवः बहुव्रीहौ सक्थ्यक्ष्णोरिष्यतः प्रागेवायं निषेधः नेह सुसक्थ्यः स्वक्षः कि
मः क्षेपे क्षेपे यः किं शब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः कुत्सितो राजा किंरा
जा। किंसखा। किंगौः नञस्तत्पुरुषात् समासान्तो न अराजा असखा नमृचाकिं
अपुरं शाकटम् पथो विभाषा नञ्पूर्वात्पथो वा समासान्तः अपथं अपन्थाः न

सि॰
कौ॰
२५

सरुषादिष्वेव अपथ्योदेशः अपथ्यं वर्त्तते इति समासान्ताः अलुगुत्तरपदे अलुगधि
कारः प्रागानङः उत्तरपदाधिकारस्त्वापादसमाप्तेः पञ्चम्याः स्तोकादिभ्यः ए
भ्यः पञ्चम्या अलुक्स्यात् उत्तरपदे स्तोकान्मुक्तः एवमन्तिकार्थदूरार्थकृच्छ्रेभ्यः
उत्तरपदे किम् निष्क्रान्तः स्तोकान्निःस्तोकः ब्राह्मणाच्छंसिन उपसंख्यानम् ब्रा
ह्मणविहितानि शास्त्राण्युपचाराद्ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी ऋ
त्विग्विशेषः द्वितीयार्थे पञ्चम्युपसंख्यानादेव ओजःसहोम्भस्तमसस्तृतीयायाः ओ

२५

जसाकृतमित्यादि अञ्जसउपसंख्यानम् अञ्जसाकृतम् आर्जवेनकृतमित्यर्थः

पुंसानुजोजनुषान्धइतिच यस्याग्रजः पुमान् सपुंसानुजः जनुषान्धः जात्यन्धः

मनसः संज्ञायाम् मनसागुप्ता आज्ञायिनिच मनसइत्येव मनसाआज्ञातुंशील

मस्यमनसाज्ञायी आत्मनश्च आत्मनस्तृतीयाया अलुकस्यात् पूरणेइतिवक्तव्य

म् पूरणप्रत्ययान्तेउत्तरपदेइत्यर्थः आत्मनापञ्चमः जनार्दनस्त्वात्मचतुर्थएवे

ति बहुव्रीहिर्बोध्यः पूरणेकिम् आत्मकृतम् वैयाकरणाख्यायांचतुर्थ्याः आ

त्मनइत्येव आत्मनेपदं आत्मनेभाषा तादर्थ्येचतुर्थीतियोगविभागात्समासः प
रस्मैच परस्मैपदं परस्मैभाषा हलदन्तात्सप्तम्याःसंज्ञायाम् हलन्तादद्न्ताच्चस
प्तम्याअलुक् संज्ञायाम् त्वचिसारः गवियुधिभ्यांस्थिरः आभ्यांस्थिरस्यसस्यषः
स्यात् गविष्ठिरः अत्रगवीतिवचनादेवालुक् युधिष्ठिरः अरण्येतिलकाः अत्रसं
ज्ञायामितिसप्तमीसमासः हृद्द्युभ्यांच हृदिस्पृक् दिविस्पृक् कारनाम्निचप्रा
चांहलादौ प्राचांदेशेयत्कारनामतत्रहलादावुत्तरपदेहलदन्तात्सप्तम्याअ

लुक् मकुटेकार्षापणं हलदिमाषकः पूर्वेणासिद्धेनियमार्थमिदंकारनाम्न्येव
प्राचामेवहलादावेवेति कारनाम्निकिं अभ्यर्हितपशुः कागादव्यसेतहेष्मीयस्य
नाम प्राचांकिं यूथपशुः हलादौकिं अविकटोरणः हलदन्तात्किं नद्यांदोहः।
नदीदोहः मध्याद्गुरौ मध्येगुरुः अन्ताच्च अन्तेगुरुः अमूर्धमस्तकात्स्वाङ्गादका
मे कण्ठेकालः उरसिलोमा अमूर्धमस्तकात्किं मूर्धशिखः मस्तकशिखः अका
मेकिम् मुखेकामोस्यमुखकामः बन्धेचविभाषा हलदन्तात्सप्तम्याअलुक् हस्ते

सि॰
कौ॰
२०१

बन्धः हस्तबन्धः हलेति किं गुप्तिबन्धः तत्पुरुषे कृति बहुलम् स्तम्बेरमः कर्णेज

पः क्वचिन्न कुरुचरः प्रावृट्शरत्कालदिवां जे प्रावृषिजः शरदिजः कालेजः दिवि

जः पूर्वस्यायं प्रपञ्चः विभाषा वर्षक्षरशरवरात् एभ्यः सप्तम्या वालुक् जे वर्षे

जः वर्षजः क्षरेजः क्षरजः शरेजः शरजः वरेजः वरजः घकालतनेषु कालनाम्न ।

सप्तम्या विभाषालुक् घ पूर्वाह्णतरे पूर्वाह्णेतरे पूर्वाह्णेतमे पूर्वाह्णतमे का

ल पूर्वाह्णकाले पूर्वाह्णेतने पूर्वाह्णतने शयवासवासिष्वकालात् खेप २०१

यः खपायः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी अप्सुयोनियन्मतिषु अ

प्सुयोनिरप्सुमतिर्येष्वप्सप्सुयोनिः अप्सुभवः अप्सव्यः अप्सुमन्तावाज्यभागौ ने

न्मिहवथादिष्वच इत्यन्वादिषुसमम्पाग्रलक नस्यागिज्जशायी साङ्कापपसिद्धः

वक्तव्यः स्यवभाषायाम् समम्पाग्रलक नसमस्यः भाषायांकिम् हलोस्याथ

देशः यथाग्राक्रोपे वैरस्यकुलम् आक्रोपेकिम् ब्राह्मणकुलम् वादिव्रपङ्को

युक्तिदाण्हरेषु वाचोयुक्तिः दिशोदण्डः पश्यतोहरः आमुष्यायणामुष्यपुत्रिका

सि॰
कौ॰
२८

आमुष्यकुलिकेति च अमुष्यापत्यमामुष्यायणः नडादित्वात्फक् अमुष्यपुत्रस्य
भावः आमुष्यपुत्रिका आमुष्यकुलिका मनोज्ञादित्वाद्वुञ् देवानांप्रिय इति च मूर्खे
अन्यत्र देवप्रियः शेपपुच्छलाङ्गूलेषु शुनः शुनःशेपः शुनःपुच्छः शुनोलाङ्गूलः ।
दिवश्च दासे दिवोदासः पुत्रेऽन्यतरस्याम् षष्ठ्याः पुत्रे परे अलुक् वा निन्दायां दास्याः
पुत्रो दासीपुत्रः निन्दायां किं ब्राह्मणीपुत्रः ऋतो विद्यायोनिसम्बन्धेभ्यः विद्यास
म्बन्धयोनिसम्बन्धवाचिन ऋदन्तात्षष्ठ्या अलुक् होतुरन्तेवासी होतुःपुत्रः पितुर

२८

नेवासी पितुःपुत्रः विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणं नेह होतृधनं पितृध

नम् विभाषा स्वसृपत्योः ऋदन्तात्षष्ठ्या अलुग्वा स्वसृपत्योः परयोः मातुःपितुर्भ्याम

मन्यतरस्याम् षष्ठ्याः स्वसुः समासे वा षत्वं स्यादसमासे मातुःष्वसा मातुःस्वसा पितुःस्वसा पि

तुःष्वसा लुकि तु मातृपितृभ्यां स्वसा षष्ठ्याः परस्य स्वसुः षः स्यात्समासे मातृष्वसा पि

असमासे तु मातुःस्वसा पितुःस्वसा

तृष्वसा इत्यलुक्समासः घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः भा

षितपुंस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्वः स्यात् घरूपकल्पप्रत्ययेषु परेषु चेलडादिषु च

ॐ. सि.कौ. २०५

घरूपादिषु ब्राह्मणितरा ब्राह्मणितमा ब्राह्मणिरूपा ब्राह्मणिकल्पा ब्राह्मणिचेली ब्रा
ह्मणिब्रुवा ब्राह्मणिगोत्रा इत्यादि। कृञः पचाद्यचि वच्यादेशयुगलयोरभावोपि निपात्य
ते चेलादीनि वृत्तिविषये कुत्सनवाचीनि कुत्सितानि कुत्सनैरिति समासः ङ्यः किं
दत्तातरा भाषितपुंस्कात्किम् आमलकीतरा कुवलीतरा नद्याः शेषस्यान्यतरस्याम् अ
ङ्यन्तनद्याः ङ्यन्तैकाचश्च घादिषु ह्रस्वो वा स्यात् ब्रह्मबन्धूतरा ब्रह्मबन्धुतरा स्त्रीत
रा स्त्रितरा कृन्नद्या न लक्ष्मीतरा लक्ष्मीतमा तन्त्रीतरा तन्त्रीतमा। उगितश्च उगितः।

२०५

प्रातिपदिकान्तरयानदी तस्मात्त्वादिषु हृल्लोवा स्मात् विड्विनरा हृल्लाभावप
देन सिल्लाघिनिषेधवत् विड्वरा हृद्यादिषु न विड्वीनरेसुदाहृतं तन्न निर्मूलम्
हृदयस्य हृल्लेखयदण्लासेषु हृदयं लेखयतीति हृल्लेखः हृदयस्य प्रियं हृद्यं
हृदयस्येदं हार्दम् हृल्लासः लेखयदणन्तस्य ग्रहणम् उचितं हृदयेन लेखः ले
खग्रहणमेव ज्ञापकमुत्तरपदाधिकारे तदन्तविधिर्नास्तीति वा शोकष्यञ्रोगे
षु हृच्छोकः हृदयशोकः सौहार्द्यं सौहृदय्यम् हृद्रोगः हृदयरोगः हृदयप

यीयोरुच्छेदोप्यस्तितेन सिद्धे शपत्न्यार्थमिदम् पादस्य पदाज्यातिगोपहतेषु पदु

त्तरपदेषु पादस्य पद इत्यदन्त आदेशः स्यात् पादाभ्यामजतीति पदाजिः पदातिः

अ अतिभ्यां पादे चेति इण्प्रत्ययः अजेर्व्यभावो निपातनात् पदगः पदोपहतः प

द्यत्यतदर्थे पादस्य पत्स्यात् अतदर्थे यति परे पादौ विध्यन्ति पद्याः शर्कराः विध्यत्यध

नुषेति यत् अतदर्थे किम् पादार्थमुदकं पाद्यम् ईके चरणावुपसंख्यानम् पादाभ्यां

चरतीति पदिकः पर्यादिभ्यामुन् हिमकाषिहतिषु च पद्धिमं पत्काषी पद्धतिः ॥ २०१

वा घोः ऋचः पादस्य पत्स्यात् शे परे गायत्रीपच्छः शंसन्ति पादं पादमित्यर्थः ऋचः कि।
म पादशः कार्षापणं ददाति वा घोषमिश्रशब्देषु पादस्य पत् पद्घोषः पादघोषः पन्मि
श्रः पादमिश्रः पच्छब्दः पादशब्दः निष्के चेति वक्तव्यम् पन्निष्कः पादनिष्कः उदक
स्योदः संज्ञायाम् उदमेघः उत्तरपदस्य चेति वक्तव्यम् क्षीरोदः पेषंवासवाहनधिषु उद
पेषं पिनष्टि उदवासः उदवाहनः उदधिर्घटः समुद्रे तु पूर्वेण सिद्धम् एकहलादौ
पूरयितव्येऽन्यतरस्याम् उदकुम्भः उदककुम्भः एकेति किं उदकस्थाली पूरयितव्ये किं

सि॰
कौ॰
२१

उदकपर्वतः मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु उदमन्थः उदकमन्थ ।
उदौदनः उदकौदन इत्यादि इको ह्रस्वोऽङ्यो गालवस्य इगन्तस्याङ्यन्तस्य ह्रस्वो वा
स्यात् उत्तरपदे ग्रामणिपुत्रः ग्रामणीपुत्रः इकः किं रमापतिः अङ्यः किम् गौरीप
तिः गालवग्रहणं पूजार्थम् अन्यतरस्यामित्यनुवृत्तेः इयङुवङ्भाविनामव्ययानां
च नेति वाच्यम् श्रीमदः भ्रूभङ्गः शुक्लीभावः अभ्रूकुंसादीनामिति वक्तव्यम् भ्रूकुंस ।
भृकुंसः भ्रुकुटिः भृकुटिः अकारोऽनेन विधीयत इति व्याख्यान्तरम् भ्रकुंसः भ्रकु ॥

टिः भ्रुवाकुंसो भाषणं शोभा वा यस्य स स्त्रीवेशधारी नर्त्तकः भ्रुवाकुटिः कौटि

ल्यम् एकतद्धिते एकशब्दस्य ह्रस्वः स्यात् तद्धिते उत्तरपदे च एकस्या आगतमेक

रूप्यं एकक्षीरम् ङ्यापोः संज्ञाछन्दसोर्बहुलम् रेवतिपुत्रः अजक्षीरम् त्वे च ॥

ङ्यापोर्वा ह्रस्वः अजत्वम् रोहिणित्वम् ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ष्य

ङन्तस्य पूर्वपदस्य संप्रसारणं स्यात् पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे संप्रसार

णस्य च संप्रसारणस्य दीर्घः स्यात् उत्तरपदे परे कौमुदगन्ध्यायाः पुत्रः कौमु

कौमुदगन्धीपुत्रः

सि.

कौ.

२१२

दगन्धीपतिः व्यवस्थितविभाषयाह्वो नस्त्रीप्रत्यये वानुपसर्जने नेति तदादिनि यमप्रतिषेधानूपरमकारीषग

न्धीपुत्रः उपसर्जने नेति तदादिनि यमात्रेहस्वत्वं कारीषगन्ध्यापुत्रः बन्धुनि बहुव्रीहौ बन्धुशब्दे उत्तरपदे ष्यङः

संप्रसारणं स्यात् बहुव्रीहौ कारीषगन्ध्याबन्धुरस्य कारीषगन्धीबन्धुः बहु

व्रीहौ किं कारीषगन्ध्यायाबन्धुः कारीषगन्ध्याबन्धुः ङीवनिर्देशात्तशब्दस्या

पेतया मातन्मातृकमातृषु वा कारीषगन्धीमातः कारीषगन्ध्यामातः का

रीषगन्धीमातृकः कारीषगन्ध्यामातृकः कारीषगन्धीमाता कारीषगन्ध्यामा

२१२

ता अस्मादेव निपातनान्मातृशब्दस्य मातजादेशः कप् विकल्पश्च बहुव्रीहावे।

वेदम् कारीषगन्ध्यायामाता [illegible] कारीषगन्ध्यामाता विभ्रमा

मर्थान्नित्यो बहुव्रीहिस्समासं बाधते इष्टकेषीकामालानां चिततूलभारिषु इष्टका।

दीनां तदन्तानां च सर्वपदानां चितादिषुत्तरपदेषु ह्रस्वः स्यात् इष्टकचितं प

क्वेष्टकचितं इषीकतूलम् मुञ्जेषीकतूलम् मालभारी उत्पलमालभारी कारे सत्यागद

स्य मम् स्यात् सत्यङ्कारः अगदङ्कारः अस्तोश्चेति वक्तव्यम् अस्तङ्कारः धेनोर्भव्यायां

सि॰
कौ॰
२१२

येनुभया लोकम्पृणे लोकम्पृणः पृणातेर्मूलविभुजादित्वात्कः इत्येऽनभ्याशस्य
अनभ्याशमित्यः दूरतः परिहर्तव्य इत्यर्थः भ्राष्ट्राग्न्योरिन्धे भ्राष्ट्रमिन्धः अग्निमिन्धः।
गिलेऽगिलस्य तिमिङ्गिलः अगिलस्य किं गिलगिलः गिलगिले च तिमिङ्गिलगिलः
उग्रम्भद्रयोः करणे उग्रङ्करणम् भद्रङ्करणम् रात्रेः कृति विभाषा रात्रिञ्चरः रा
त्रिचरः रात्रिमटः रात्र्यटः अखिदर्थमिदं सूत्रं खिति तु अरुर्द्विषदिति नित्यमेव वक्ष्यते
रात्रिम्मन्यः सहस्य सः संज्ञायाम् उत्तरपदे परे सपलाशं संज्ञायां किं सहयुध्वा अश्वा

२१२

न्नाथिके च अनयोरर्थयोः सहस्य स उत्तरपदे परे सम्महूर्त्तं ज्योतिषमधीते सद्रोणा
खारी द्वितीये वा अनुपाख्ये अनुमेये द्वितीये सहस्य सः स्यात् सराक्षसीका निशा राक्षसी
साक्षादनुपलभ्यमाना निशयानुमीयते समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु समान
स्य सः स्यादुत्तरपदे न तु मूर्धादिषु अनुभ्राता सगर्भ्यः अनुसखा सयूथ्यः यो नः सनुत्यः
तत्र भवस्यर्थे सगर्भसयूथसनुतात् यत् अमूर्धादिषु किम् समानमूर्धा समानप्रभृतय ॥
समानोदर्काः समानस्येति योगो विभज्यते तेन सपक्षः साधर्म्यसजातीयमित्यादि सि

सि॰
कौ॰
२१५

स्मिति काशिका अथवा मश्शब्दः सद्भाववचनोस्ति सदृशः साधुः समास इति यथा तेना
यमस्य पदविग्रहो बहुव्रीहिः समानः पक्षोस्येत्यादि ज्योतिर्जनपदरात्रिनाभिनामगो
त्ररूपस्थानवर्णवयोवचनबन्धुषु एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात् सज्योतिः
सजनपदमित्यादि चरणे ब्रह्मचारिणि ब्रह्मचारिण्युपपदे समानस्य सः स्यात् चरणे
समानेवेनगम्यमाने चरणः शाखा ब्रह्म वेदः तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति
ब्रह्मचारी समानः ब्रह्मचारी सब्रह्मचारी तीर्थे ये तीर्थे उपपदे यादौ प्रत्यये विवक्षिते

समानस्य सः स्यात् सतीर्थ्यः एकगुरुकः समानतीर्थेवासीतियत्प्रत्ययः विभाषो
दरे यादौप्रत्ययेविवक्षितेइत्येव सोदर्यः समानोदर्यः दृग्दृशवतुषु सदृक् सदृ
शः दृक्षेचेतिवक्तव्यम् सदृक्षः वतुस्तुनराशौ इदंकिमोरीश्की दृग्दृशवतुषु इदमः
ईदृशः कीदृक्
ईश् किमः कीस्यात् ईदृक् कीदृशः वतूदाहरणंवक्ष्यते दृक्षेच ईदृक्षः कीदृक्षः
आ सर्वनाम्नः सर्वनाम्नः आकारः स्यात् दृग्दृशवतुदृक्षेषु तादृक् तादृशः तावान्
तादृक्षः दीर्घः समोने अन्यादृक् अन्यादृशः अन्यादृक्षः समासेऽङ्गुलेःसङ्गः अङ्गुलि

सि॰
कौ॰
२१५

प्राद्यात्संगस्य सस्य मूर्धन्यादेशः स्यात् समासे अङ्गुलिषङ्गः समासे किं अङ्गुलिसङ्गः॥
भीरोः स्थानम् भीरुशब्दात्स्थानस्य सस्य मूर्धन्यः स्यात् समासे भीरुष्ठानम् असमासे
न भीरोः स्थानम् ज्योतिरायुषः स्तोमः ज्योतिष्टोमः आयुष्टोमः समासादित्येव स
मूर्धन्यः स्यात् शोभनं साम सुषाम सुषन्धिः एति संज्ञायामगात् सस्य मूर्धन्यः ह
रिषेणः एति किं हरिसक्थः संज्ञायां किम् पृथुसेनः अगकारात् किं विष्वक्सेनः इ
एकोरित्येव सर्वसेनः नक्षत्राद्वा एति संज्ञायामगकारान्मूर्धन्यो वा रोहिणीषेणः रो

अणकारात्विकृत्वात्मिबन्नेनः

द्विणीमेनः आकृतिगणोयम् अथ अस्मत्तीयाम्यमास्मद्गाशीराशाम्याह्वितोन्व

कोतिकारकरागव्येषु अस्मशाहस्मद्गागमःस्यात् आषीरादिषुपरेषु अस्मदाषीः

अस्मदाशा अस्मदास्या अस्मदास्थितः अस्मद्दत्तकः अस्मद्धृतिः अस्मद्रागः अस्मद्वीमा

दिर्कि अस्मस्यामेनवाषीः [illegible] स्माषीः कारकेव्येवनायंनिषेधः अस्मत्कारकः अस्म

त्कारकः अस्मस्मायमस्मदीयः गहादेराकृतिगणत्वाच्छः अर्थेविभाषा अस्मदर्थः

अस्मार्थः कोःकत्तत्पुरुषेचि अजादावुत्तरपदेकुत्सितः अश्वः कदश्वः कदन्नम् नन्न

सि॰ कौ॰ १८

रुषे किम् कुत्सितो राजा [त्रैव] कुत्सितास्त्रयः कत्रयः रथवदयोश्च कद्रथः कद्वदः तृणे च जातौ कत्तृणम् कापथ्यक्षयोश्च कापथं काक्षः अक्षशब्देन तत्पुरुषः ~~अक्षशब्देन~~ अक्षिशब्देन च बहुव्रीहिर्वा ईषदर्थे ईषज्जलम् काजलम् अजादावपि परे कादेशः काम्लः विभाषा पुरुषे कापुरुषः कुपुरुषः अप्राप्तविभाषेयम् ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव [ईषत्पुरुषः कापुरुषः] कवं चोष्णे उष्णशब्दे उत्तरपदे कवं कावा वा स्यात् कवोष्णम् कोष्णम् कदुष्णम् पृषोदरादीनि यथोपदिष्टम् पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः पृषत् १८

उदरम् पृषोदरम् तलोपः वारिवाहको बलाहकः पूर्वपदस्य बः उत्तरपदादेश्च लत्वा

वर्णविकृते

म् भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् गूढोत्मा वर्णनाशात्पृषोदरम् दिक्

शब्देभ्यस्तीरस्य तारभावो वा दक्षिणतारम् दक्षिणतीरम् उत्तरतारम् उत्तरतीरम्

दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च दुःखेन दाश्यते दूडाशाः दुःखेन नाश्य

ते दूणाशाः दुःखेन दभ्यते दूडभः खल् विध्याः दम्भेर्नलोपश्च निपात्यते दुष्टं ध्याय

न्ति दूढ्याः ध्यानेश्चेति कः ब्रुवन्तोस्यां सीदन्ति इति बृसी ब्रुवच्छब्दस्य बृङ् आदेशः स

सि॰
कौ॰
२१७

ऽरथिकरणेऽडु प्राकृतिगणोयम् संहितायामधिकारोयम् कर्णेलक्षणस्याविष्टा
ष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य कर्णशब्दे परे लक्षणवाचकस्य दीर्घः ॥

लक्षणस्य किं शोभनकर्णः

द्विगुणाकर्णः अविष्टादीनां किं विष्टकर्णः अष्टकर्णः पञ्चकर्णः मणिकर्णः भिन्न
कर्णः छिन्नकर्णः छिद्रकर्णः स्रुवकर्णः स्वस्तिककर्णः नहिवृतिवृषिव्यधिरुचिस
हितनिषु क्वौ क्विबन्तेषु पूर्वपदस्य दीर्घः स्यात् उपानत् नीवृत् प्रावृट् मर्मावि
त् नीरुक् अभीरुक् ऋतीषट् परीतत् क्वौ किम् परिणहनम् विभाषा पुरुषे

इत्यतोमण्डूकप्लुत्याविभाषानुवर्तते साचव्यवस्थिता तेनगतिकारकयोरेव ने
ह पद्र्दुक वनगिर्योः संज्ञायांकोटरकिंशुलकादीनाम् कोटरादीनांवनेपरेकिं
शुलकादीनांगिरौपरेदीर्घःस्यात् संज्ञायां वनंपुरगामिश्रकाशारिकाकोटरा
ग्रेभ्यः वनशब्दस्योत्तरपदस्थस्यणत्वंनत्वन्येभ्यः इहकोटरान्ताःपञ्चदीर्घवि
धौकोटरादयोबोध्याः तेषांकृतदीर्घाणांणत्वविधौनिर्देशोनियमार्थः अग्रेश
ह्रस्वत्वविपर्ययः पुरगावणंमिश्रकावणंसिध्रकावणंशारिकावणं कोटराव

णं पथ्यपदेतिकिम् असिपत्रवनम् वनस्याग्रे अग्रेवणम् राजदन्तादिषु निपातना
त्सप्तम्या अलुक् प्रातिपदिकार्थमात्रेप्रथमा किंशुलकागिरिः वलेवलप्रत्येप
रेदीर्घःस्यात् संज्ञायांकृषीवलः मतौबह्वचोनजिरादीनाम् अमरावती अनजि
रादीनांकिं अजिरवती बह्वचःकिं व्रीहिमती संज्ञायामित्येव नेह वलयवती
शरादीनांच शरावती इकोवहेपीलोः इगन्तस्यदीर्घःस्याद्वहे ऋषीवहम् क
पीवहं इकःकिं पिण्डवहं अपील्वादीनामितिवाच्यम् दारुवहम् अपीलोःकिं।

पीलुवहम् \ उपसर्गस्य घञ्यमनुष्ये बहुलम् उपसर्गस्य बहुलं दीर्घः स्यात् घ
ञन्ते परे ऽमनुष्ये परिपाकः परीपाकः अमनुष्ये किं निषादः इकः काशे इ
गन्तस्योपसर्गस्य दीर्घः स्यात् काशे वीकाशः नीकाशः इकः किं प्रकाशः अष्ट
नः संज्ञायाम् उत्तरपदे दीर्घः अष्टापदम् संज्ञायां किं अष्टपुत्रः चितेः कपि एक
चितीकः द्विचितीकः नरे संज्ञायाम् विश्वानरः मित्रे चर्षौ विश्वामित्रः संज्ञायां
किं विश्वमित्रो माणवकः शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः ।

सि॰
कौ॰
२१५

स्यादन्तरस्यादि प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योसंज्ञायामपि ए

भ्योवनस्यणत्वंस्यात् प्रवणं कार्ष्यवणं इक्षुवणमित्याद्यसंज्ञार्थमिदम् विभाषौषधिवन

स्पतिभ्यः वनस्यणःस्यात् दूर्वावणं दूर्वावनं शिरीषवणं शिरीषवनं द्व्य त्र्य भ्या

मेव नेह देवदारुवनम् इरिकादिभ्यः प्रतिषेधो वक्तव्यः इरिकावनं तिमिरकाव

नं वाहनमाहितात् आरोप्य यदुह्यते उदाविस्यान्निमित्तात्परस्य वाहननकार

स्यणत्वंस्यात् इक्षुवाहणं आहितात् किं इन्द्रवाहनम् इन्द्रस्वामिकं वाहनमित्यर्थः २१५

वहेतेः स्वदिहद्विरिहेवमुत्रेनिपातनात् पानंदेशे पूर्वपदस्थान्निमित्तात्परस्य
पानस्यनस्यणत्वंस्यात् देशेगम्ये क्षीरंपानंयेषांते क्षीरपाणाः उशीनराः सुरापा
णाः प्राच्याः पीयतेइतिपानंकर्मणिल्युट् वाभावकरणयोः पानमित्येवक्षीर
पाणं क्षीरपानम् करणे क्षीरपाणः क्षीरपानः कंसः गिरिनद्यादीनांवा गिरिण
दी गिरिनदी चक्रणितम्बाचक्रनितम्बा प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपद
स्थान्निमित्तात्परस्यप्रथमस्थितस्यनस्यणोवास्यात् प्रातिपदिकान्ते माषवापिणौ

सि.
कौ.
२२.

मिश्रीहिवापाणि विभक्तौ माषवापेण पदे माषवापिनावित्यादि उत्तरपदं य

प्रातिपदिकं तदन्तस्यैव णत्वं नेह गर्गाणां भगिनी गर्गभगिनी अन्तपदवत्त्वमत्र

हणं कृतं सूत्रमन्त्रविधानानात ङ्कोहितम् न[illegible]त्नूपदस्मर्किंच प्रहिण्वति

द्विवेर्नुमो णत्वाप्नीमपि नुं प्रकृत्यं प्रेन्वनमित्यादौ

त्यादौ तु ददर्शादिनान्न युवादेर्न रम्यश्रनापरिपक्वानि पक्वान्युत्तरपदेणः नि

त्यमिसत्रके वृत्रहणौ हरिमानयतीति हरिमाणी व्रुमिती रपाणि विभक्तौ दी

र्घेण रम्यवि[illegible]णा कुमतिव कवर्गवति उत्तरपदे प्रान्त्वत् हरिकामिणो हवि

२२.

कार्म्मणि हरिकामेण पदस्यव्यवायेपि पदेनव्यवधानेणत्वंनस्यात् माषकुम्भवापे
न चतुरङ्गयोगेन अतद्धितइतिवाच्यम् आर्द्रगोमयेण शुष्कगोमयेण कुस्तुम्
बुरूणिजातिः अत्रसुट् निपात्यते कुस्तुम्बुरुः धान्याकम् क्लीवत्वंमतन्त्रं जातिःकिं
कुतुम्बुरूणि कुत्सितानितिन्दुकीफलानीत्यर्थः पारस्करप्रभृतीनिचसंज्ञायाम् प
तानिससुट्कानिनिपात्यन्ते नाद्विपारस्करः किष्किन्धा अपरस्पराःक्रियासात
त्ये सुड्निपात्यते अपरस्पराः सार्थागच्छन्ति सततमविच्छेदेनगच्छन्तीत्यर्थः कि

सि॰
कौ॰
२२१

यासातत्येइतिकिम् अपरपरागच्छन्ति अपरेचपरेचसकृदेवगच्छंति गोष्पदंसेविता
सेवितप्रमाणेषु सुट् सषत्वंनिपात्यते गावः पद्यन्तेस्मिन्देशेसगोभिः सेवितोगो
ष्पदः असेविते अगोष्पदान्यरण्यानि प्रमाणे गोष्पदमात्रंक्षेत्रंसेवितइत्यादिकि
म् गोपदम् आस्पदंप्रतिष्ठायाम् आत्मयापनायस्थानेसुट् निपात्यते आस्पदम
नेनलब्धम् प्रतिष्ठायांकिं आपदापदम् आश्चर्यमनित्ये अद्भुतेसुट् आश्चर्यंय
दिसभुञ्जीत अनित्येकिं आश्चर्यंकर्मशोभनम् वर्चस्केवस्करः कुत्सितंवर्चोवर्च

स्कमत्रमलंतस्मिन्कुटे अवकीर्यते इत्यवस्करः वर्चस्केकिं अवकरः अपस्करोर-
थाङ्गम् अपकरोन्यः विष्किरः शकुनौविकिरोवा पक्षेविकिरः वावचनेनैव सिद्धि
कल्पेसिद्धेविकिरग्रहणंतस्यापिशकुनेरन्यत्रप्रयोगोमाभूत् इतिवृत्तिः तत्रभाष्य
विरोधात् प्रतिष्कशश्चकशेः कशगतिशासनयोरित्यस्यप्रतिपूर्वस्यपचाद्यचिसुट्
एनपामतेषत्वंचसहायः पुरोयायीवा प्रतिष्कशशब्दस्यार्थे कशेःकिंप्रतिगतःक
शांप्रतिकशोश्वः यद्यपिकशेरेवकशातथापिकशेरिति धातोर्ग्रहणमुपसर्गस्य

सि॰
कौ॰
२२२

प्रेतर्ग्रहणार्थम् तेनथावन्नरोपसर्गोत्र प्रस्तावहरिश्चन्द्राहयी हरिश्चन्द्रग्रहणा॰
मतमन्त्रार्थम् त्रयीकिं प्रकाणवोदेशाः हरिचन्द्रोमाणवकः मस्करमस्करिणौ
वेणुपरिव्राजकयोः मकरशाह्रोत्सुमयन्नमन्त्रमट् इतिसूत्रनिपात्यते वेणावितिकिं
मकरोग्राहः मकरीसमुद्रः कास्तीराजस्तुन्देनगरे ईषत्तीरमस्येतिकास्तीरंनाम
नगरम् अजस्येवतुन्दमस्येत्यजस्तुन्दंनामनगरम् नगरेकिं कातीरम् अजतुन्द
म् कारस्करोवृक्षः कारंकरोतीतिकारस्करः अन्यत्रकारकरः केचित्तुकस्कादि २२२

षिंदंपदन्निनस्तेषु पारस्करेतिसूत्रंएवैंलिखितम् वनतयोःसुट् तलोपश्च ता

स्वैंवचेनेनकारोपिबोध्यः तद्बृहतोर्दकारतकारौलोप्येते करपत्योस्सुट् चौर

देवतयोरिति समस्वायोपाधिः तस्करः बृहस्पतिः प्रायस्यचित्तिचित्तयोः प्राय

श्चित्तिः प्रायश्चित्तम् वनस्पतिरित्यायाकृतिगणोयम् इतिसमासाश्रयाविधय :

समाप्तः समर्थानांप्रथमाद्वा इदंपदत्रयमधिक्रियते प्राग्दिश इतियावत् सा

मर्थ्यंपरिनिष्ठितत्वंकृतसन्धिकार्यत्वमितियावत् प्राग्दीव्यतोण् तेनदीव्यती

स्यतः प्रागपिक्रियेत अश्वपत्यादिभ्यश्च एभ्योऽण् स्यात् प्राग्दीव्यतीयेष्वर्थेषु वक्ष्य
माणस्य ण्यस्यापवादः तद्धितेष्वचामादेः ञितिणिति च तद्धिते परे अचामादेरचो
वृद्धिः स्यात् किति च किति तद्धिते च तथा अश्वपतेरपत्यादि आश्वपतम् गाणपत
म् गाणपत्यो मन्त्र इति तु प्रामादिकमेव दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः दि
त्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् अणोऽपवादः दैत्यः अ
दितेरादित्यस्य वा आदित्यः प्राजापत्यः यमाच्चेति काशिकायां याम्यः पृथिव्या ञा

ञ्ञौ पार्थिवः पार्थिवी देवाद्यञञौ दैव्यं दैवं बहिषष्टिलोपो यञ्च बाह्यः ईकक्च

वाहीकः स्थाम्नोकारः अश्वत्थामः पृषोदरादित्वात्समतः भवार्थे तु गवाद्यः अश्व

त्थामा लोम्नोपत्येषु बहुषु बाह्वादीञोपवादः उडुलोमाः बहुषु किं औडुलोमिः

गोरजादिप्रसङ्गे यत् गव्यं अजादिप्रसङ्गे किं गोभ्यो हितम् आगत गोरूप्यं गोमयम्

उत्सादिभ्योञ् औत्सः अग्निकलिभ्यां ढग्वक्तव्यः अग्नेरपत्यादि आग्नेयं कालेयम्

इत्यपत्यादिविकारान्तार्थसाधारणाः प्रत्ययाः स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् था

सि॰
कौ॰
२२४

स्मानांभवेनेऽस्मतः प्राग्वत्येष्वस्त्रीपुंसाभ्यांकस्मात् नञ् स्नञौ स्त्रैणः स्त्रैणः पौंस्नः वत्यर्थे।
नस्त्रीपुंवद्भ्योतिज्ञापकात् स्त्रीवत् पुंवत् द्विगोर्लुगनपत्ये द्विगोर्निमित्तंयस्तद्धितो
जादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्यलुक्स्यात् पञ्चसुकपालेषुसंस्कृतः पुरोडाशः ।
पञ्चकपालः द्विगुनिमित्तइतिकिम् पाञ्चकपालंशाकलं अजादावितिकिम् पञ्च
गर्गरूप्यम् अनपत्यइतिकिम् द्वयोर्मित्रयोरपत्यंद्वैमित्रिः गोत्रेलुगचि अजादौप्रा
ग्दीव्यतीयेविवक्षितेगोत्रप्रत्ययस्यालुक्स्यात् गार्ग्याणांछात्राःवृद्धाच्छः आपत्यस्यच २२४

तद्धितेनाति हलःपरस्यापत्ययकारस्यलोपःस्यात् तद्धितेपरे बहुकारेगार्गीयाः
प्राग्दीव्यतीये किं गर्गेभ्योहितंगर्गीयम् इतिलक् प्राग्दीव्यतीयेजादौप्रत्ययेविव
क्षितेयुवप्रत्ययस्यलुक्स्यात् ग्लुचुकस्यगोत्रापत्यंग्लुचुकायनिः तस्यछात्राःफिञ्
तस्योलुक्स्यात् ग्लौचुकायनाः अणोलुकिवृद्धत्वाभावाच्छोन पैलादिभ्यश्च पैलादिभ्योयुवप्र
त्ययस्यलुक्स्यात् पीलायावेत्यण् तस्मादणोद्व्यच इतिफिञ् तस्यलुक् पैलःपितापु
त्रश्च तद्राजाच्चाणः द्व्यञ्मगधेत्यनन्तादञ् पाद्यादणोद्व्यच इतिफिञोलुक् आङ्गः

सि॰
कौ॰
२२५

पिता पुत्रश्च इञः प्राचां गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् स्यात् तच्चेद्गोत्रं प्राचां
भवति पन्नागारस्यापत्यं पुत्र इञ् यञिञोः फक् पान्नागारिः पिता पुत्रश्च प्राचां।
किम् दाक्षिः पिता दाक्षायणः पुत्रः न तौल्वलिभ्यः तौल्वल्यादिभ्यः परस्य युवप्र
त्ययस्य लुक् स्यात् न पूर्वेण प्राप्तः तुल्वलः ततः इञ् फक् तौल्वलिः पिता तौल्वला
यनः पुत्रः फक्फिञोरन्यतरस्याम् एनीमेव पूर्वेण नित्ये लुकि प्राप्ते विकल्पार्थम्
इदम् कात्यायनस्य छात्राः कात्रीयाः कात्यायनीयाः यस्कस्यापत्यं यास्कः पिता। २२५

ह्याम् तस्यापत्यं युवा यास्कायनिः अगोत्रचरतिफिञ् तस्य छात्रा यास्कीयाः
यास्कायनीयाः तस्यापत्यम् बहुत्वान्लुक् तमन्येः समर्थादपत्ये उक्तावसमा
सास्त्वप्रत्ययावास्यः उपगोरपत्यमौपगवः आदिवृद्धिरन्त्योपधावृद्धिं बाधते कु
तमन्येः किम् सौत्थितिः प्रकृतस्य रूपरिभाषया सा वृद्धिनिर्माभूत् समर्थपरिभा
षयानेहवस्त्रमुपगोरपत्यं दैवदत्तस्य प्रथमात्किम् अपत्यवाचकात्षष्ठ्यर्थे माभूत् वा
ग्रहणाद्वाक्यमपि देवदत्तीति तत्रादपत्य तस्मिं ग्रहणान्वर्थेः समासोपि उपगवा।

नैस्यदमिक त्यपत्ये षि
वापत्यार्थे कृ तेभ वेत्
उत्सर्गः दोषणवासौ
तद्धान्त स्य प्रयोजनं
योगविभागस्तु भानोर
पत्यं भानवः ३५

पत्यं जातिवाद्ङीष् औपगवी आश्वपतः दैत्यः औत्सः स्त्रैणः पौंस्नः अपत्यं पौत्रप्रभृ
ति गोत्रम् अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् जीवति तु वंश्ये युवा वंश्ये
पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् न तु गोत्रसंज्ञम् भ्रा
तरि च ज्यायसि ज्येष्ठे भ्रातरि जीवति कनीयान् चतुर्थादिर्युवा स्यात् वान्यस्मिन्स
पिण्डे स्थविरतरे जीवति भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरप
त्यं जीवदेव वा युवसंज्ञं स्यात् एकं जीवति ग्रहणमपत्यस्य विशेषणं द्वितीयं सपि

ष्ठस्य तरमिदं शाडुभयोरुत्कर्षार्थः स्थानेनवयसावोत्कृष्टेपितृव्येपितामहेभ्रात

रिवाजीवति गार्ग्यस्यापत्यंगार्ग्यायणः गार्ग्योवा स्थविरेतिकिं स्थानवयोन्यूनेगा

र्ग्यएवजीवतिकिं मृतेमृतोवागार्ग्यएव वृद्धस्यचपूजायामितिवाच्यम् गोत्रमेववृद्ध

संज्ञाप्रावाम् गोत्रस्ययुवसंज्ञापूजायांगम्यमानायांतत्रभवान् गार्ग्यायणः सूढिया

नकिम् गार्ग्यः यूनश्चकुत्सायाम् गोत्रमेवेतिवाच्यम् गार्ग्योजाल्मः कुत्सितेकिम्

गार्ग्यायणः एकोगोत्रे गोत्रेएकएवापत्यप्रत्ययःस्यात् उपगोर्गोत्रापत्यमौपगवः॥

सि॰
कौ॰
११२

गार्ग्यः नाडायनः गोत्रैस्त्रैकोनसंख्यावां प्रत्ययानां परम्परा यद्वा स्वहूनसंख्येभ्योनि
ह्योत्पत्तिः प्रसज्यते श्रूपत्वं पितुरेव स्यात्ततः प्रायामपीति च मतभेदेन तद्वाच्यं सूत्रमे
तत्रयोत्रयोत्ररम् पितुरेवापत्यमिति पक्षे हि उपगोस्तृतीयेवाच्ये औपगवादित्या
त् चतुर्थेतत्जीवत्सेषु मृतवंश्ये औपगवेः फक् इत्यं फगिञोः परम्परायां मृत्ता।
ख्यातनमे गोत्रेणकोनपातं प्रत्ययास्तः पितामहादीनामपीति मुख्यपक्षे तत्तृतीयेवा
च्ये उपगोरपत्याद्दृष्टे मिहेयणन्नादिजपिस्यात् चतुर्थे ततः फगिति फञिञोः परम ११२

गार्ग्यायणानां तेमे गोत्रे इष्टनवतिरनिष्टप्रत्ययाः स्युः अतो नियमार्थमिदं सूत्रम् प

रमप्रकृतेः स्त्रेइष्टसम् गोत्राद्यन्यस्त्रियाम् स्त्र्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययाः स्या

त् स्त्रियां तद्युवसंज्ञा गर्गस्य युवापत्यं गार्ग्यायणः स्त्रियां गोत्रत्वादेकप्रत्य

यः अत इञ् तस्मात् अदन्तं यत्प्रातिपदिकं तस्मात्कृत्तिकान्यछान्तादिञ् स्यात् अप

त्यर्थे दाक्षिः बाह्वादिभ्यश्च बाहविः औडुलोमिः आकृतिगणोयम् सुधातुरक

ङ् च वा दिञ् स्यात् सुधातुरपत्यं सौधातकिः व्यासवरुडनिषादचाण्डालबिम्बानां चे

सि॰
कौ॰
२२८

तिवक्तव्यम् नय्वाभ्यांपदान्ताभ्यांपूर्वौतुताभ्यामैच् पदान्ताभ्यांयकारवकारा-
भ्यांपरस्यवृद्धिर्नकिन्तुताभ्यांपूर्वौक्रमादैचावागमौस्तः वैयासकिः वारुट
किरित्यादि गोत्रेकुञ्जादिभ्यश्च्फञ् व्रातच्फञोरस्त्रियाम् व्रातवाचिभ्यः च्फ
ञन्तेभ्यश्चस्वार्थेञ्यः स्यात् नतुस्त्रियाम् कौञ्जायन्यः बहुत्वेतद्राजत्वाल्लुग्वक्ष्य
ते कौञ्जायनाः व्राध्नायन्यः स्त्रियांकौञ्जायनी गोत्रत्वेनजातित्वात् ङीष् अनन्त
रापत्ये कौञ्जिः नडादिभ्यः फक् गोत्रइत्येव नाडायनः चारायणः अनन्तरो नाडिः २२८

हरितादिभ्योञः एभ्योञन्तेभ्यो यूनि फक् हारितायनः इह गोत्राधिकारेपि सा

मर्थ्याद्यून्यपि नहि गोत्रादपरो गोत्रप्रत्ययः यञिञोश्च गोत्रे यौ यञिञौ तदन्तात्फक्

स्यात् युवानीत्येके रापस्मेति यत्नोपोन गार्ग्यायणः दाक्षायणः शारद्वत् शुनक

दर्भाणाद्भृगुवत्साग्रायणेषु गोत्रे फग्वा अञिञोरपवादः अञ्यो विदादी शार

द्वतायनो भार्गवश्चेत् शारद्वतोन्यः शौनकायनो वात्स्यश्चेत् शौनकोन्यः दार्भाय

णः आग्रायणश्चेत् दार्भिरन्यः द्रोणपर्वतजीवन्तादन्यतरस्याम् एभ्यो गोत्रे फग्वा

द्रौणायनः द्रौणिः पार्वतायनः पार्वतिः जैवन्तायनः जैवन्तिः अनादिरिह द्रोणास्यः अ
श्वत्थाम्न्यनन्तरे रूपवागात् अनृष्यानन्तर्ये बिदादिभ्योञ् एभ्योञ् गोत्रे ये त्वत्रानृ
षयस्तेभ्यआनन्तर्येञ् बिदस्य गोत्रं बैदः अनन्तरा बैदिः बाह्वादेराकृतिगणत्वा
दिञ् पुत्रस्यापत्यं पौत्रः दौहित्रः गर्गादिभ्यो यञ् गोत्र इत्येव गार्ग्यः वात्स्यः य
ञञोश्च गोत्रे यत् यञन्तं अञन्तं च तदवयवयोरेतयोर्लुक् स्यात् तत्कृते च बहुत्वे
न तु स्त्रियां गर्गाः वत्साः बिदाः उर्वाः तत्कृते किं प्रियगार्ग्याः अस्त्रियां किं गार्ग्यः

क्षियः गोत्रेकिम् हैप्याः ऊन्माः प्रवराध्यायप्रसिद्धमिहगोत्रं तेनेहत्रपौत्राः दौहि
त्राः मधुवभ्रोर्ब्राह्मणकौशिकयो गोत्रेयत् माथव्याब्राह्मणः माथवोन्यः बा
भ्रव्यः कौशिकः बाभ्रव्योन्यः वभ्रुशाह्मणगर्गापिपादान्निहेनियमार्थमिदम् ग
र्गादिपादफलेन लोहितादिकार्यार्थम् बाभ्रव्यायणी कपिबोधादङ्गिरसे गो
त्रेयत्स्मात् काप्यः बोध्यः आङ्गिरसेकिं कापेयः बोधिः वनस्पत्र आङ्गिरसर
मेव वानस्पः अनाङ्गिरसेनगर्गादौशिवादौचपादायजणेवानस्पः वानस्प ।

सि॰
कौ॰
२३॰

लक्स्त्रियाम् वतण्डाच्चेति विहितस्य लुक्स्यात् स्त्रियाम् शार्ङ्गरवादित्वात् ङीन् व
तण्डी अनाङ्गिरसे तु वातण्ड्यायनी लोहितादित्वात्ष्फः आङ्गिरसे तु वातण्डी ऋषि
वाहसमाणःष्यङ् अश्वादिभ्यःफञ् गोत्रे आश्वायनः पुंसिजाते पुंसीति प्रकृ
ति विशेषणं जातस्यापत्यं जातायनः पुंसीति किम् जाताया अपत्यं जातेयः भर्गा
त्त्रैगर्ते गोत्रे फञ् भार्गायणस्त्रैगर्तः भार्गिरन्यः शिवादिभ्योऽण् गोत्रे इति निवृत्तम्
शिवस्यापत्यं शैवः गाङ्गः पैतनिकादित्वात्फिञ् गाङ्गायनिः शुभ्रादित्वाड्ढक्॥ ४४

गाङ्गेयः अवृद्धाभ्योनदीमानुषीभ्यस्तन्नामिकाभ्यः अवृद्धेभ्योनदीमानुषीना
मभ्योऽस्मात् ढकोपवादः यामुनः नार्मदः चिन्तितायाअपत्यंचैन्तितः अवृद्धा
भ्यःकिंवासवदत्तेयः नदीभ्यारिकिं वैनतेयः तन्नामिकाभ्यःकिं शोभनायाअ
पत्यंशोभनेयः ऋष्यन्धकवृष्णिकुरुभ्यश्च ऋषयोमन्त्रद्रष्टारः वासिष्ठःवैश्वामि
त्रः अन्धकेभ्यः श्वाफल्कः वृष्णिभ्यः वासुदेवः आनिरुद्धः पौरिरिति नबाह्वादि
त्वात् कुरुभ्यः नाकुलःसाहदेवःइञपवापवादोऽयंमध्येऽपवादन्यायात् अत्रिशा

हात्परत्वाड्ढक् भ्रात्रेयः मातुरुत्संख्यासंभद्रपूर्वायाः संख्यादिपूर्वस्य मातृ
शब्दस्य उदादेशः अण्प्रत्ययश्च द्वैमातुरः साम्मातुरः आदेशार्थं वचनं प्रत्ययस्तु
उत्सर्गेणैव सिद्धः स्त्रीलिङ्गनिर्देशाद्धान्यमातुर्न संख्येति किम् सौमात्र
शुभ्रादिभ्यश्च शौभ्रेयः कन्यायाः कनीन च चकोपवादोऽण् तत्संनियोगेन क
नीनादेशश्च कानीनो व्यासः कर्णश्च अनूढायापत्यमित्यर्थः विकर्णशु
ङ्गच्छगलाद्वत्सभरद्वाजात्रिषु अपत्ये वैकर्णिर्वात्स्यः शौङ्गो भारद्वाजः शौङ्गि

रन्यः छागल आत्रेयः छागलिरन्यः केचित्तु शुङ्गेत्याबन्तं पठन्ति ते वा ढक प्रत्य

दाहरन्ति शौङ्गेयः पीलाया वा तन्नामिकाण्वा पिला द्व्यच इति ढकि प्राप्ते पक्षे

ण विधीयते पीलाया अपत्यं पैलः पैलेयः ढक्च मण्डूकात् चादण् पक्षे इञ् मा

ण्डूकेयः माण्डूकः माण्डूकिः स्त्रीभ्यो ढक् स्त्रीप्रत्ययान्तेभ्यः ढक् स्यात् वैन

तेयः बाह्वादित्वात्सौमित्रिः शिवादित्वात्मापत्ना द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढ

कस्मात् तन्नामिकाणोपवादः दात्तेयः पार्थिरन्यत्तत्तमस्येदमित्यण् इत्यत्रानिञ ः

सि॰
कौ॰
२३१

इकारान्ताद्द्व्यचोपत्ये ढक स्यात् न त्विञन्तात् दौलेयः नैधेयः आत्रेयः आत्रेयो अ
त्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च एभ्यो गोत्रप्रत्ययस्य तत्कृते बहुत्वे लुक्स्या
त् न तु स्त्रियाम् अत्रयः भृगवः कुत्साः वसिष्ठाः शुभ्रादिभ्यश्च शुभ्रस्यापत्यं शौ
भ्रेयः विकर्णकुषीतकात्काश्यपे अपत्ये ढक वैकर्णेयः कौषीतकिः भ्रुवो
वुक च ढक भ्रौवेयः प्रवह्णस्य ढे प्रवह्णस्योत्तरपदस्याचामादेर्वृ
द्धिः पूर्वपदस्य तु वा ढे परे प्रवह्णस्यापत्यं प्रावाह्णेयः प्रवाह्णेयः तस्यापत्यम्

व ढगन्तमप्रवहणशाह्मप्राम्बहृद्धिर्वाञ्जितिणितिकिनिच प्रवहणयस्मा।
पत्यंप्रावाहणेयिः प्रवाहणेयिः बाभ्रवहितनिमित्ताहृद्धिः ढाक्षेयाणविक
ल्पेनबाधितंनप्राकानेइतिसूत्रारम्भः कल्याण्यादीनामिनङ्. एषामिनङादे
शःस्यात ढकर्कास्याणिनेयः बान्धकिनेयः कुलटायावा इनङ्प्रात्रविकल्प
ते ढकनिमःएवैणेवकौलटिनेयः कौलटेयः सतीभिक्षुकाचकुलटा यात्त
यभिचारार्थंकुलाम्पटतीतितस्याःक्षुद्राभ्योवेति पत्तेढक कौलटेरः इन्द्रा।

सिन्ध्वन्ते पूर्वपदस्य च हृदाद्यन्तेषूत्तरपदयोरचामादेरचो वृद्धिः ञिति किति
च परे सुहृदोऽपत्यं सौहार्दिः सुभगाया अपत्यं सौभागिनेयः सक्तुप्रधानाः सिन्ध
वः सक्तुसिन्धवः तेषु भवाः साक्तुसैन्धवाः चटकाया ऐरक् चटकस्येति वाच्यम्
लिङ्गविशिष्टपरिभाषया सिद्धमपि चटकस्य चटकाया वा अपत्यं चाटकैरः स्त्रि
यामपत्ये लुग्वक्तव्यः तयोरेवापत्यं चटका अजादित्वाट्टाप् गोधाया ढ्रक्।
गौधेरः शुभ्रादित्वात् ढक् गौधेयः आरगुदीचाम् गौधारः रकासिद्धे आका

णेश्चारणमस्मान्नेविधानार्थम् जडस्यापत्यंजाडारः पाण्डस्यापत्यंपाण्डारः क्षुद्रा

भ्योवा अङ्गहीनाः शीलहीनाश्च क्षुद्राः ताभ्योवा ढ्रक् काणेरः काणेयः दासेरः

दासेयः पितृष्वसुश्छण् अणोपवादः पैतृष्वस्रीयः ढकिलोपः पितृष्वसुरन्त्यलो

पः स्यात् ढकि अणपवादः ढक् पैतृष्वसेयः मातृष्वसुश्च पितृष्वसुर्यदुक्तं तदस्या

पिस्यात् मातृष्वसेयः चतुष्पाद्भ्यो ढञ् पभ्योढञ् ढेलोपोकद्र्वाः कद्रुभिन्नस्यो

वर्णान्तभस्यलोपः स्यात् ढेपरे कामण्डलेयः कमण्डलुशब्दश्चतुष्पाज्जातिविशेषे

सि॰
कौ॰
२२४

गष्ट्यादिभ्यश्च एभ्यो ढञ् स्यात् अणढकोरपवादः गार्ष्टेयः मित्रयोरपत्यं स्यापि
प्राप्ते ढञ् केकयमित्रयुप्रलयानां यादेरियः एषां यकारादेरियादेशः स्यात् ञि
ति णिति किति च तद्धिते परे इति इयादेशे प्राप्ते दाण्डिनायनहास्तिनायनाथर्वणिक
जैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥
एतानि निपात्यन्ते इति युलोपः मैत्रेयः मैत्रेयौ यस्कादिभ्यो गोत्रे एभ्यो गोत्रप्रत्यय
स्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम् मित्रयवः बह्वच इञः प्राच्यभरतेषु बह्वच

२

परोयइञ् प्राच्यगोत्रे भरतगोत्रे च वर्त्तमानः तस्माल्लुक् पन्नागाराः युधिष्ठिराः
नगोपवनादिभ्यश्च गोत्रप्रत्ययस्य लुङ्कस्मात् विदाद्यन्तर्गणोयम् गौपवनाः शै
ग्रवाः तिककितवादिभ्यो द्वन्द्वे एभ्यो गोत्रप्रत्ययस्य बहुत्वेलुग्वास्मात् तैकायन
यश्च कैतवायनयश्च तिकादिभ्यःफिञ् तस्माल्लुक् तिककितवाः उपकादिभ्यो
न्यतरस्यामद्वन्द्वे एभ्यो गोत्रप्रत्ययस्य बहुत्वेलुग्वास्मात् द्वन्द्वे वाद्वन्द्वे च भ्राष्टक
कपिष्ठलाः भ्राष्टकिकापिष्ठलयः लमकाः लामकायनाः आगस्त्यकौण्डिन्याः

सि॰
कौ॰
२२५

योरगस्तिकुण्डिनच् एतयोरवयवस्य गोत्रप्रत्ययस्याणो यञश्च बहुषु लुक्स्या
त् अवशिष्टस्य प्रकृतिभागस्य यथासंख्यम् अगस्तिकुण्डिनच् एतावादेशौ स्तः अ
गस्तयः कुण्डिनाः राजदन्तादिषु परम् राज्ञोजानांवेवेतिवाच्यम् येचाभावकर्मणो ः
यादौतद्धितेपरेअन् प्रकृत्यास्यात् नत्वभावकर्मणोः राजन्यः श्वशुर्यः जाति
ग्रहणात्क्षुद्रादावपत्ये राजनः अन् अणि अन् प्रकृत्यास्यादितिटिलोपो न।
अभावकर्मणोः किं राज्ञः कर्मभावोवाराज्यम् संयोगाश्च इत्यकृत्याणिपरेच

क्विणोपसंख्याक्विणः नमस्वैपस्मेवर्मणः मस्वैन् शक्मानस्मान् अपस्मे।
णिभाइणमः मस्वैः किं मौननः अपस्मेकिम् वर्मणापरिहतोचार्मेणारथाः अ
वर्मणाः किं चक्रवर्मणोपसंख्याकवर्मणः वाहितनाम्नइतिवाच्यम् हितना।
म्नोपसंहेतनामनः हैतनामः आत्मोजातौ योगविभागोत्रकर्तव्यः आत्मइतिनि
पात्यते अनपस्मेणि आत्मेहविः ततोजातौ अपस्मेजातावणिब्रह्मणष्टिलोपो
नस्मात् ब्रह्मणोपसंख्याब्रह्मणः अपस्मेकिं आत्मीऊषधी ऊतमनपस्मे अणिटि

लोपो निपात्यते ऊर्जस्वलंपदम् ब्रह्मण्ये किं उदाणोपत्यमौदाणः घर्षवेद्यन्यतरा
तामणि घर्षवेयोगात् तस्य टेरादेशाभावात् अनो लोपो णि नादणः औणाद्धः पृत
रान्तोपत्ये धातेर्गतः येति किं राजनः श्वशुर्किं ताल्पणः क्षत्राद्घः क्षत्रियः
जातावित्येव क्षात्रिरन्यः कुलात्खः कुलीनः तदन्तादपि उत्तरसूत्रे अपूर्वपदा
दिति लिङ्गात् आढ्यकुलीनः अपूर्वपदादन्यतरस्यां यड्ढकञौ कुलादि
त्येव पक्षे खः कुल्यः कौलेयकः कुलीनः पदग्रहणं किं बहुकुल्यः बाहुकुले

यकः बहुकुलीनः महाकुलादञ्खञौ महाकुलशब्दादञ्खञौ इमैतौप्रत
यौस्तः अन्यतरस्यांग्रहणानुवृत्तेःखश्च माहाकुलः महाकुलीनः खञ्पते
तमाहाकुलीनः दुष्कुलाड्ढक् सर्ववत् पक्षेखः दौष्कुलेयः दुष्कुलीनः॥
स्वसुश्छः स्वस्रीयः भ्रातुर्व्यच्च वाच्छः अणोपवादः भ्रातृव्यः भ्रात्रीयः व्यन्सप
त्ने भ्रातुर्व्यन् प्रकृतिप्रत्ययसमुदायेन शत्रौवाच्ये भ्रातृव्यः शत्रुः पाप्मनाभ्रा
तृव्येणेतिद्रुपचारात् रेवत्यादिभ्यष्ठक् ठस्येकः अङ्गात्परस्यठस्येकादेशः

सि॰
कौ॰
३३२

स्यात् रैवतिकः गोत्रस्त्रियाःकुत्सनेणच गोत्रंयास्त्रीतद्वाचकाच्छब्दात् ण
ठकौस्तःकुत्सायां सामर्थ्याद्यूनि गार्ग्याअपत्यंगार्गः गार्गिकोवाजाल्मः भ
स्याढेतद्धितइतिपुंवद्भावात् गार्ग्यशब्दात् णठकौ यस्येतिलोपःआपत्यस्ये
तियलोपः वृद्धाट्ठकसौवीरेषुबहुलम् सवीरदेशोद्भवाःसौवीराः वृद्धात्सौ
वीरगोत्राद्यूनिबहुलंठक्स्यात् कुत्सायां भागवित्तिः भागवित्तिकः पक्षेढक्
भागवित्तायनः फेश्छच फिञन्तात्सौवीरगोत्रा दपत्येछः ठक्च कुत्सनेगम्य ३३२

मानेयमुन्दस्यापत्यं यामुन्दायनिः यामुन्दायनीयः यामुन्दायनिकः कु

त्सने किम् यामुन्दायनिः औत्सर्गिकस्याणोऽपवादस्त्रियेतिल्लुक सौवीरेषु

किं नैकायनिः फाण्टाहृतिमिमताभ्यां णफिञौ सौवीरेष्विनेह यथासंख्य

मत्रास्वरस्परनिपानादितिहृन्तिः भाष्ये तु यथासंख्यमेवाश्रितम् फाण्टा

हृताः फाण्टाहृतायनिः मैमतः मैमतायनिः कुर्वादिभ्यो ण्यः पत्ये कौरव्या

ब्राह्मणाः वावहूकाः सम्राजः क्षत्रिये सम्राज्यः साम्राजोऽयः सेनान्तलक्ष

सि॰
कौ॰
५३८

णकारिभ्यश्च पथ्योण्यः हारिषेण्यः लाक्षण्यः कारीशिल्पीतस्मात् तान्तुवा-
य्यः कौम्भकार्यः नापित्यः उदीचामिञ् हारिषेणिः लाक्षणिः तान्तुवायिः
कौम्भकारिः नापितात्परत्वात्फिञ्चेव नापितायनिः तदेतानुपसन्तानम् ला-
न्ताः पदेनालक्षणः तिकादिभ्यः फिञ् तैकायनिः कौशल्यकार्मार्याभ्यां च ॥
श्रुपमेरिञ् इञोपवादः परमप्रकृतेरेवायमिष्यते प्रत्ययसन्नियोगेनप्रा-
कृतिरूपं निपात्यते ऊपान्त्यस्यापत्यं कार्मार्यायणिः छागवृषयोरपि छागया

यनिः वार्ष्यायणिः अणोह्यवः अपत्येफिञ् इञोऽपवादः कात्र्यायणिः अणइ

तिकिं दाक्षायणः द्व्यचःकिं औपगविः त्यदादीनां फिञ्वावाच्यः त्यादायनिः।

त्यादः वाकिनादीनां कुक्च अपत्येइञ्वा वाकिनकायनिः वाकिनिः पुत्रान्तादन्यत

रस्याम् अस्मादपि फिञ्सिद्धः तस्मिन्परे पुत्रान्तस्यवा कुग्विधीयते गार्गीपुत्राय

णिः गार्गीपुत्रकायणिः गार्गीपुत्रिः उदीचांवृद्धादगोत्रात् आम्रगुप्तायनिः

प्राचांन आम्रगुप्तिः वृद्धात्किं दाक्षिः अगोत्रात्किं औपगविः प्राचामवृद्धात्फिन्

हुलम् ग्लुचुकायनिः मनोर्जातावञ्यतौ षुक्च समुदायार्थो जातिः मानुषः मनु
ष्यः जनपदशब्दात्क्षत्रियादञ् जनपदक्षत्रिययोर्वाचकादञ्स्यादपत्ये दाण्डि
नायनेतिसूत्रेनिपातनाट्टिलोपः ऐक्ष्वाकः ऐक्ष्वाकौ क्षत्रियसमानशब्दाज्जन
पदा तस्य राजन्यपत्यवत् तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात्
पञ्चालानां राजा पाञ्चालः पूरोरण्वक्तव्यः पौरवः पाण्डोर्ड्यण् पाण्ड्यः साल्वे
यगान्धारिभ्यां च आभ्यामपत्येञ् वृद्धेदितिञ्यङोपवादः साल्वेयः गान्धारः तस्य रा

जनमसेवम् द्व्यञ्मगधकलिंगसूरमसादण् अञोपवादः द्व्यच् आङ्गः वाङ्गः ।
सौह्मः मागधः कालिङ्गः सौरमसः तस्यराजन्येप्येवं वृद्धेत्कोसलाजादाञ्ञ्यङ्
वृद्धात् आम्बष्ठ्यः सौवीर्यः इत् आवन्त्यः कौसल्यः अजादस्यापत्यमाजाद्यः कुरु
नादिभ्योण्यः कौरव्यः नैषध्यः सनैषधस्यार्थपतेः स्तनायामिमादौत्तशैषिकोण्
साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् साल्वोजनपदस्तदवयवाउदुम्बरा
दयस्तेभ्यः प्रत्यग्रथादिभ्यस्त्रिभ्यश्चरञ्जस्मात् अञोपवादः औदुम्बरिः प्रात्यग्रथि ।

सि॰
कौ॰
२५

कालकूटिः आश्मकिः राजन्यप्येवं ते तद्राजाः अञादयस्तत्संज्ञाः स्युः तद्राज
स्य बहुषु तेनैवास्त्रियाम् बहुष्वर्थेषु तद्राजस्य लुक् स्यात् तदर्थकृते बहुत्वे न तु
स्त्रियाम् इक्ष्वाकवः पञ्चालाः इत्यादि कथं तर्हि कौरव्याः पशवः तस्यामेव र
घोः पाण्ड्याः इत्यादि कौरव्ये पाण्ड्ये च साधवः समाधेयम् रघू
णामन्वयं वक्ष्ये निरूप्यमानाय द्राघोर्ह्योत्तरपदमेतत्तया कम्बोजाल्लुक् अ
स्मात्तद्राजस्य लुक् कम्बोजः कम्बोजौ कम्बोजादिभ्य इति वक्तव्यम् चोलः पा

कः। चम्नल्लणस्यानोल्लक केरलः यवनः अग्नोल्लक कम्बोजाः समेरइतिपाठ ।

स्तगमः दीर्घादिपाठेनकम्बोजोभिजनोयेषामित्यर्थः अश्वनत्तशिलादिभ्यो

णस्याविनस्य स्त्रियामवन्तिकुन्तिकुरुभ्यः तद्राजस्यलुक्स्यात् अवन्ती कुन्ती

कुरूः अतश्च तद्राजस्याकारस्यस्त्रियां लुक्स्यात् शूरसेनी मद्री कथंमाद्रीसुता

विति ह्रस्वपाठ इतिहरदत्तः भर्गादिभ्यो वाकल्प्य नप्राच्यभर्गादियौधे

यादिभ्यः एतेभ्यस्तद्राजस्यनलुक पाञ्चाली वैदर्भी आङ्गीवाङ्गी मागधी एते

सि॰
कौ॰
२४८

प्राच्याः भार्गी कारूषी कैकेयी केकयी अत्र जन्यजनकभावलक्षणे पुंयोगे

ङीष् पुथाश्रुका श्राभ्यांच्चषाइतिष्यामणाजाविमञ्च शार्ङ्गरवाद्युपठक ततः

स्त्रार्थे पार्श्वादियौधेयादिभ्यामणञाविमञ्च शार्ङ्गरवाद्यञ इति ङीन् श्रुत

श्रुतिस्त्वकित्त्वढगन्ताङ्गी ष्वदाननिवृत्तिस्वरः स्यात् यौधेयी शौक्रेयी अणि

ञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे आदीनामन्त्यमुत्तमं तत्समीपमुपोत्तमं

गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ॥२४८॥

ष्यङादेशः स्यात् निर्दिश्यमानस्यादेशा भवन्तीति अणिञोरेव ष्यङादिनो ष्यङ्
स्यात् कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या वाराह्या अनार्षयोः किं वासिष्ठी वैश्वा।
मित्री गुरूपोत्तमयोः किं औपगवी जातिलक्षणोऽङीष् गोत्रे किं अहिच्छत्रे जाता
आहिच्छत्री गोत्रावयवात् गोत्रावयवा गोत्राभिमताः कुलाख्यास्ततो गोत्रे वि
हितयोरणिञोः स्त्रियां ष्यङादेशः स्यात् अगुरूपोत्तमार्थमारम्भः पौणिक्या
क्रौड्यादिभ्यश्च स्त्रियां ष्यङ् स्यात् अगुरूपोत्तमार्थो नियमार्थश्चारम्भः क्रौड्या

सि॰
कौ॰
२४२

वाड्या सूतयुवत्याम् सूत्या भोज क्षत्रिये भोज्या दैवयज्ञिशौचिवृक्षिसात्यमुग्रिका
ण्ठेविद्धिभ्योन्यतरस्याम् एभ्यः स्त्रियां ष्यङ्वा स्यात् अगोत्रार्थमिदम् गोत्रेपि
परत्वाद्वर्त्ततेपक्षे इतोमनुष्येति ङीष् दैवयज्ञ्या दैवयज्ञी इति पञ्चाधिकारः तेन
रक्तं रागात् रज्यतेनेनेति रागः कषायेण रक्तं वस्त्रं काषायं माञ्जिष्ठम् रागात्किम्
देवदत्तेन रक्तं वस्त्रम् लाक्षारोचनाट्ठक् लाक्षिकः रौचनिकः शाकलकर्दमाभ्या
मुपसंख्यानम् शाकलकर्दमाभ्यामुपसंख्यानम् शाकलिकः कार्दमिकः आभ्या २४२

मणापीतिहत्रिकारः शाकलः कार्दमः नील्या अन् नील्या रक्तं नीलं पीतात्कन् पी
तकम् हरिद्रामहारजनाभ्याम् अञ् हारिद्रम् माहारजनम् नक्षत्रेण युक्तः काल ः
पुष्येण युक्तं पौषमहः पौषी रात्रिः लुबविशेषे सर्वत्र विहितस्य लुप्स्यात् षष्टिदा
ण्डात्मकस्य कालस्यावान्तरविशेषस्येत्यागमेत अद्य पुष्यः कथं तर्हि पुष्ययुक्ता पौ
र्णमासी पौषीति विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्य इति निर्देशेन पौर्ण
मास्यामयं लब्धोऽनित्यापितत्वात् श्रवणाशब्दात् अतएव लप् युक्तवद्भावाभाव

स्व श्रवाय्यकाम्यपिनिपातनानि श्रावणी संज्ञायां श्रवणाश्वत्थाभ्याम् विशेषार्थो
यमारम्भः श्रवणारात्रिः श्रश्वत्थोमुहूर्तः संज्ञायां किं श्रावणीश्राश्वत्थी ह्रस्वाल्लु ।
नक्षत्रद्वन्द्वाद्युक्तेकालेऽस्याः स्यादिशेषेमनसतिव तिष्यपुनर्वसवीयमहः रा।
धानुराधीयारात्रिः दृष्टंसाम तेनेत्येव वसिष्ठेनदृष्टंवासिष्ठंसाम श्रमित्रेयैणा।
दिद्वावणाः उशनसाद्दृष्टमौशानसम् औशनसम् कलेर्ढक् कलिनादृष्टंकाले
यंसाम वामदेवाड्ड्यड्ड्यौ वामदेवेनदृष्टंसामवामदेव्यम् सिद्धेयस्यतिलोपेनकि

मर्थ्यंयतो ग्रहणंमानदर्थेभ्रत्वामदेवमनञ्जरे परिवृतोरथः वस्त्रैःपरिवृतो
वास्त्रोरथः रथः किं वस्त्रेणपरिवृतः कायःसममन्नोद्धेष्टितः परिवृतोगुरुः पा
ण्डुकम्बलादिभिः पाण्डुकम्बलेनपरिवृतः पाण्डुकम्बली पाण्डुकम्बलशब्दो
राजास्तरणवर्णकम्बलस्यवाचकः मत्वर्थीयेनैवसिद्धेवचनमणोनिवृत्त्यर्थम्॥
द्वैपवैयाघ्रादय् द्वीपिनोविकारोद्वैपं तेनपरिवृतोद्वैपोरथः एवंवैयाघ्रः कौ
मारापूर्ववचने कौमारेत्यविभक्तिकोनिर्देशः अपूर्वेतेनिपात्यमिदम् अपूर्वे

पतिं कुमारीमुपपन्नः कौमारः पतिः । यद्वा अपूर्वपतिः कुमारी पतिमुपपन्ना कौमा
री भार्या । तत्रोद्धृतममत्रेभ्यः । शरावे उद्धृतः शाराव ओदनः । उद्धरतिरिह उद्धरणपू
र्वके निधाने वर्त्तते । तेन सप्तमी । उद्धृतमिति हितप्रत्ययार्थः । स्थण्डिलाच्छयितरि व्रते । त
त्रैव समुदायेन व्रतं गम्यते । स्थण्डिले शयितुं व्रतमस्य स्थाण्डिलो भिक्षुः । संस्कृ
तं भक्षाः । सप्तम्यन्तादण् स्यात् संस्कृतं भक्षाश्चेत् । भ्राष्ट्रे संस्कृता भ्राष्ट्राः । अष्टसु क
पालेषु संस्कृतो ऽष्टाकपालः पुरोडाशः । शूलोखाद्यत् । अणोऽपवादः । शूले संस्कृतं शू

सं मांसम् उखा पात्रविशेषः तस्मिं संस्कृतम् भक्षम् दध्नष्ठक् दधि संस्कृतं दाधिकं

उदश्वितोन्यतरस्याम् ठक् स्यात् पक्षेण् इसुसुक्तान्तात्कः इसुस उक् तान्ताद-

ङ्गात्परस्य ठस्य कः स्यात् उदकेन श्वयति वर्धते इत्युदश्वित् तत्र संस्कृतं औदश्वित्कं ।

औदश्वितः इत्यत्र प्रतिपदोक्तग्रहणात् नेह आशिषा चरति आशिषिकः उषा चरति

औषिकः दोषउपसंख्यानम् दोर्भ्यां चरति दौष्कः क्षीराड्ढञ् अत्र संस्कृतमित्येव

सम्बध्यते ननु अस्य इति तेन यवाग्वामपि भवति क्षैरेयी सास्मिन्पौर्णमासीति ॥

सि॰
कौ॰
२४५

तिष्याहान्संज्ञायामिति लभ्यते पौषी पौर्णमास्यस्मिन्पौषो मासः आग्रहायण्य

श्वत्थाट्ठक् अग्रेहायनमस्मादस्यामाग्रहायणी प्रज्ञादेराकृतिगणत्वादण् पू

र्वपदात्संज्ञायामिति णत्वम् आग्रहायणी पौर्णमासी अस्मिन्नाग्रहायणि

को मासः अश्वत्थेन युक्ता पौर्णमासी अश्वत्थी निपातनात्पौर्णमास्यामपि ल

प् आश्वत्थिकः विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः एभ्यष्ठक् वा

पक्षेऽण् फाल्गुनिकः फाल्गुनो मासः श्रावणिकः श्रावणः कार्त्तिकिकः का २४५

निकः चैत्रिकःवैत्रः सामस्देवता इन्द्रोदेवतासोमपेयंहविः पाशुपतं बार्हस्पत्यंतस
ज्यमानइध्म उद्देशपविशेषोदेवतामन्त्रस्तस्मावेषन्दोमन्त्रः आग्नेयोवैश्वानरो
देवतेयेतित्वयोपिकर्मसर्वेश्चाग्नीतिढक कसेन शाकपाह्मस्मकारादेशाः स्मा
त् प्रमयसन्नियोगेनयस्मतिलोपात्स्वनादादिवृद्धिः कोत्रलादेवतास्मका
यंहविः श्रीर्देवतास्मश्रायम् शुक्राङ्कन शुक्रियम् अपोनपृपोनपृषांनाय्यः
अपोनप्त्रियंअपांनप्त्रियं अपोनपात अपांनपात्व देवता प्रत्ययसन्नियोगेन

सि॰
कौ॰
२४८

ष्यकं रूपं निपात्यते अपोनप्त्रे अपांनप्त्रे ब्रूहीति प्रैषः छघयोगविभा
गो यथासंख्यनिपातनार्थः अपोनप्त्रीयम् अपांनप्त्रीयम् शत
रुद्राद्घश्च वा छः शतंरुद्रा देवतास्य शतरुद्रियम् शतरुद्रीयम् छघयोर्विधान
सामर्थ्याद्द्विगोर्लुगनपत्य इति न लुक् महेन्द्राद्घाणौ च वा छः महेन्द्रियं हविः मा
हेन्द्रम् महेन्द्रीयम् सोमाट्ट्यण् सौम्यम् टित्वात् ङीप् सौमी ऋक् ऋतव्यम् वाय्वृ
तुपित्रुषसो यत् वायव्यम् ऋतव्यम् रीङृतः अकृद्यकारेऽसार्वधातुके यकारे

परेऽस्मदन्ताङ्गस्येजादेशः स्यात् येऽमतिचपि अत्र उदात्तः द्यावापृथिवीशुनासीर
मरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च वा घत् द्यावापृथिवीयम् द्यावा
पृथिव्यम् शुनासीरीयम् अग्नेर्ढक् आग्नेयम् कालेभ्यो भववत् मासिकम् प्राहृ
षेण्यम् महाराजप्रोष्ठपदाट्ठञ् माहाराजिकम् प्रौष्ठपदिकम् देवताद्वन्द्वे च
उभयोर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् ञ्णिति किति च परे आग्निमारुतम् नेन्द्रस्य पर
स्य सौमेन्द्रः परस्य किं ऐन्द्राग्नः दीर्घाच्च वरुणस्य दीर्घात्परस्य वरुणस्य न वृ

सि॰
कौ॰
२४७

द्विः ऐन्द्रावरुणं दीर्घोक्तिं आग्निवारुणीमानडुहीम् तदस्मिन्वर्ततइतिनवय
ज्ञादिभ्यउपसंख्यानम् नावयज्ञिकः कालः पाकयज्ञिकः पूर्णमासादणवक्त
व्यः पूर्णः मासो स्यां वर्तते पौर्णमासीतिथिः पितृव्यमातुलमातामहपिताम
हाः एतेनिपात्यन्ते पितुर्भ्रातरिव्यत् पितुर्भ्रातापितृव्यः मातुर्डुलच् मातुर्भ्रा
तामातुलः मातृपितृभ्यांपितरिडामहच् मातुःपिता मातामहः पितुःपिता
पितामहः मातरिषिच्च मातामही पितामही अवेर्दुग्धेसोढदूसमरीसचोवक्तव्याः ४७

ग्रविद्दंगयम् सकारपाठसामर्थ्यान्नषः ग्रविमोढ्ढं ग्रविदूसंग्रविमरीसम् ति
लाच्चिष्फलात्मिञ्ज्ञपेजौ तिलपिञ्जः तिलपेजः वन्ध्यातिलइत्यर्थः पिञ्जश्छान
दिश्व तिल्पिञ्जः तस्यसमूहः काकानांसमूहः काकवाकम् भिक्षादिभ्योण
भिक्षाणांसमूहो भैक्षम् गर्भिणीनांसमूहो गार्भिणम् इहभस्याढ इतिपुंवद्भा
वेकृते इत्रणपनपत्ये अनपत्यार्थेश्रणि परेइत् सङ्कमातेन नस्ताद्धिते इतिटिलो
पोनइयुवतीनांसमूहो यौवतम् शाचन्द्रादन्तदाद्देराज्ञियौवतम् गोत्रोक्षोष्ट्रो

रभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् । एभ्यः समूहे वुञ् स्यात् । लौकिकमिह
गोत्रं नत्वापत्यमात्रम् । युवोरनाकौ । युवु एतयोरनुनासिकयोः क्रमात् अनअ
क एतावादेशौ स्तः । ग्लुचुकायनीनां समूहो ग्लौचुकायनकम् । औक्षकम् । इत्या
दि । आपत्यस्य चेति यलोपे प्राप्ते प्रकृत्याके राजन्यमनुष्ययुवानः । राजन्यकम् । मा
नुष्यकम् । वृद्धाच्चेति वक्तव्यम् । वार्द्धकम् । केदाराद्यञ्च । चाद्वुञ् । कैदार्यम् । कैदारक
म् । गणिकायाश्चेति वक्तव्यम् । गाणिक्यम् । ठञ्कवचिनश्च । चात्केदारादपि क

वविनां समूहो काववविकम् कैदारिकम् ब्राह्मणमाणववाडवाद्यन् ब्राह्म-

ण्यं मानव्यं वाडव्यं पृष्ठोऽपसंख्यानम् पृष्ठ्यः ग्रामजनबन्धुभ्यस्तल् ग्रामता ज-

नता बन्धुता गजसहायाभ्यां चेति वक्तव्यम् गजता सहायता अह्नः खः क्रतौ अ-

हीनः अहर्गणसाध्यस्क्रतुराकः क्रतुरित्यर्थः क्रतौ किं आह्नः इहाखण्डकादि-

दम् अह्नष्टखयोरेवेति नियमनाट्टिलोपो न पर्श्वा णस् वक्तव्यः किंनिव सि-

तिपेरसेंवपदंस्मात् अभवादोर्ग्गणोन पर्शूनां समूहः पार्श्वम् अनुदात्तादेरञ् का-

सि॰
कौ॰
२४५

पोतम् मायूरम् खण्डिकादिभ्यश्च अञ्स्यात् खण्डिकानां समूहः खाण्डिकम्
वडवाभ्योपमेवत् काढकम् ब्राह्मोगणम् अचित्तहस्तिधेनोष्ठक् साक्तुकं हा
स्तिकम् धैनुकम् केशाश्वाभ्यां यञ्छावन्यतरस्याम् पचेदगणौ कैशयम् कैशि
कम् आश्वीयम् आश्वम् पाशादिभ्यो यः पाशपान्स्या धूम्या वन्या वात्या खलगो
रथात् खल्या गव्या रथ्या इनित्रकट्यचश्च खलादिभ्य इनिः क्रमात्स्युः खलिनी गो
त्रा रथकट्या खलादिभ्य इनिर्वक्तव्यः डाकिनी कुटुम्बिनी आकृतिगणोऽयम्॥ २४५

विषयोदेशे षष्ठ्यन्तादणादयःस्युः अत्यन्तपरिशीलितेर्थेमेवेह् ।शिवी

नांविषयोदेशः शैवः देशेकिं देवदत्तस्यविषयोनुवाकः राजन्यादिभ्योवुञ्।

राजन्यकः भौरिक्याद्यैषुकार्यादिभ्योविधल्भक्तलौ भौरिकीनांविषयोदेशः

भौरिकिविधं भौलिकिविधं ऐषुकारिभक्तं सारसायनभक्तम् सोस्यादिरि

तिच्छन्दसःप्रगाथेषु पंक्तिरादिरस्येतिपांक्तः प्रगाथः स्वार्थेउपसंख्यानम् त्रि

ष्टुभेवत्रैष्टुभम् संग्रामेप्रयोजनयोद्धृभ्यः सोस्येत्यनुवर्तते सुभद्राप्रयोजन

मस्मसंग्राममेमेति सौभद्रः भरतायोद्धारोस्यसंग्रामस्यभारतः तदस्यांप्रहरणम्।
मितिक्रीडायांणः दण्डः प्रहरणमस्यांक्रीडायांदाण्डामौष्टा घञःसास्यांक्रि
येतिञः घञन्तात्क्रियावाचिनः प्रथमान्तादस्यामिति सप्तम्यर्थेस्त्रीलिङ्गेञ
प्रत्ययःस्यात् घञइतिकृद्ग्रहणान्नतिकारकसर्वस्यापिग्रहणम् श्येनतिल
स्यपातेञे श्येनतिलस्येनयोःमुमागमःस्यात् अप्रत्ययेपरेपातशब्दे उत्तरा
पदेश्येनपातोस्यां श्यैनंपाता मृगया तिलपातोस्यांवर्त्तते तैलंपाता स्वधा श्ये

नतिलस्यकिं दाण्डपाणोस्यांतियोवर्नीते दाण्डपाना तदधीतेतद्वेद व्याकरण।

मधीतेवेदवावैयाकरणः क्रमकथादिसूत्रान्नाद्वुक् क्रतुविशेषवाचिनामे

वग्रहणं तेभ्योसूत्रार्थेभ्योवेदितरि तत्प्रतिपादकग्रन्थेप्यध्येतरि अग्निष्टोमि

कः वाजपेयिकः उक्थंसामविशेषस्तल्लक्षणपरोग्रन्थविशेषोलक्षणयोक्थं त

दधीतेवेदवाऔक्थिकः सूत्रार्थान्यव्यथशब्दात् ठगणोनेष्यते न्यायं नैयायिक ः

वृत्तिं वार्त्तिकः लोकायतं लौकायतिकः इत्यादि सूत्रान्तादकल्पादेरेवेष्यते।

सांग्रहसूत्रिकः अकल्पादेः किं कालसूत्रः विद्यालक्षणकल्पान्ताच्चेति वक्त।
म् वायसविद्यिकः गौलक्षणिकः आश्वलक्षणिकः पाराशरकल्पिकः अंग
क्षत्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यम् अंगविद्यः क्षात्रविद्यः धर्मविद्यः त्रि
विद्या विद्यात्रिविद्या तामधीते वेद वा त्रैविद्यः आख्यानाख्यायिकेतिहासपुरा
णेभ्यश्च यावक्रीतमधिकृत्य कृतमाख्यानमुपचाराद्यावक्रीतं तदधीते वेद
वा यावक्रीतिकः वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता प्रिय

हस्यकृतेषु केऽन्यं एहहाख्यः नमल्लवाख्यायिकाभ्यो बहुलमिति लुप् त

तोनेनठक वासवदत्तिकः ऐतिहासिकः पौराणिकः सर्वादेः सादेश्च द्विगो

श्च द्विगोश्च लुग्वक्तव्यः सर्ववेदानधीते सर्ववेदः सर्वतन्त्रः सर्ववार्तिकः सादे

ष्टा सवार्तिकः ससंग्रहः द्विगोः लुगिति लुक द्वितान्त्रः इकन्पदोत्तरपदात

शतषष्टेः षिकन्पथः पूर्वपदिकः उत्तरपदिकः शतपथिकः शतपथिकी।

षष्टिपथिकः षष्टिपथिकी क्रमादिभ्यो वुन् क्रमकः क्रमपदशिक्षामीमांसा

क्रमादिः । अनुब्राह्मणादिनिः । तदधीते तद्वेदेत्यर्थे ब्राह्मणसदृशोग्रन्थोनुब्रा
ह्मणं तदधीतेनुब्राह्मणी । मत्वर्थीयेनैव सिद्धे णिन्यर्थमिदम् । वसन्तादि
भ्यष्ठक् । वासन्तिकः । आथर्वणिकः । दाण्डिनायनसूत्रे निपातनाट्टिलोपो
न । प्रोक्ताल्लुक् प्रोक्तार्थप्रत्ययात् परस्याध्येतृवेदितृप्रत्ययस्य लुक्स्यात् । प
णनं पणः । घञर्थे कविधानमिति कः । सोऽस्यास्तीति पणी तस्य गोत्रापत्यं पा
णिनः । गाथिविदथिकेशिपणिगणिनश्च । एतेपि प्रकृत्यास्युः । इति टिलोपो न ॥ १५१ ॥

ततोऽयूनिरस्य पाणिनिः ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ण्यप्रत्य
यान्तात् क्षत्रियप्रत्ययान्तात् तत्रप्रत्ययान्तात् ऋष्यभिधायिनो गोत्रप्रत्ययान्तात्
ञितश्च परयोर्युवाभिधानयोरणिञोर्लुक् स्यात् कौरव्यः पिता कौरव्यः पुत्र :
श्वाफल्कः पिता श्वाफल्कः पुत्रः वासिष्ठः पिता वासिष्ठः पुत्रः नैकायनिः
पिता नैकायनिः पुत्रः एभ्यः किं गार्ग्यायणः कौहडः पिता नन्तरस्य कौहडि :
पुत्रः ऋषि किं वामरथ्यस्य छात्राः वामरथ्याः इति इञोऽलुक् न भवति आर्षे

सि॰
कौ॰
१५२

ग्रहणेन प्रतिपदोक्तस्य कृद्ग्रहणस्यैव ग्रहणात् पाणिनिना प्रोक्तं पाणिनीय
म् इहाद्धः यत्नेन स्मृतम् न न गोत्रेयदञ् तदन्तादिति वक्ष्यमाणत्वात् ततो
ऽपत्ये वेदितव्यः णोऽल्पकः स्वेरस्त्रियांच विशेषः पाणिनीया सूत्रास्त्रकोपपात्॥
सूत्रवाचिनः ककारोपधादपत्ये वेदितव्यः प्रत्ययस्य लुक् स्यात् ग्रन्थोक्तार्थश्रा
रम्भः ग्रन्थावस्थायाः परिमाणमस्मादष्टकं पाणिनेः सूत्रम् तदधीयते विदः
त्रिकाष्टकाः छन्दोब्राह्मणानि च तद्विषयाणि छन्दांसि ब्राह्मणानि च विषये

ऋश्यमयान्नानितद्विषयाणिभ्यः अध्येतृवेदितृप्रत्ययं विनान प्रयोज्ञानी।
मर्थः कठेन प्रोक्तमधीयते कठाः वैशम्पायनान्तेवासित्वाण्णिनिः तक्षक
द्वारकादितिलुक् ततोण् तक्षप्रोक्ताच्छुक् तस्मिन्नस्तीति देशे तन्नाम्नि॥
उदुम्बराः सन्त्यस्मिन्देशे औदुम्बरः तेन निर्वृत्तम् कुशाम्बेन निर्वृत्ता कौशाम्बी
नगरी तस्य निवासः शिवीनां निवासो देशः शैवः अदूरभवश्च विदिशा।
या अदूरभवं नगरं वैदिशं चकारेण प्रागुक्ता अस्ययोर्थाः सन्निधापयन्ते तेन

सि.
कौ.
२५४

वर्त्तमानप्रत्ययाणां चातुरर्थिकत्वं सिध्यति ॥ ओरञ् अणोपवादः कदलक
तेनोरिदंकादत्ततवं नद्यान्तपरमान्मतप इलमती मतोश्च बह्वजङ्गात् बह्व
जङ्गं यस्य मत्वन्तस्य तस्मात् अण् न अणः सैध्रकावतं बह्वजिति किम् आ
हिमतं अङ्गग्रहणं बह्वजिति तद्विशेषणं यथा स्यात् मत्वन्तविशेषणं माभू
त् बह्वचः कूपेषु अणोपवादः दीर्घवरत्रेण निर्वृत्तः दैर्घवरत्रः कूपः उद
क्च विपाशः विपाश उत्तरे कूले ये कूपास्तेष्वञ् अबह्वजर्थमारम्भः दत्तेन

निर्वृत्तः कूपो दात्तः उदक्किं दत्तिमातः कूपेष्वण एव सङ्कलादिभ्यश्च कूपेष्विति
निर्वृत्तम् साङ्कलम् पौष्कलम् स्त्रीषु सौवीरसाल्वप्राक्षु स्त्रीलिङ्गेषु देशेष्वा
च्येषु प्रत्ययः सौवीरे दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी साल्वेषु वैधूमाग्नी प्राचि माकन्दी
सुवास्त्वादिभ्योऽण् अञोऽपवादः सुवास्तोरदूरभवं सौवास्तवम् वर्णु वार्णवं अण्ग्र
हणं नद्यां मतुपो बाधनार्थम् सौवास्तवी रोणी रोणीशब्दात्तदन्ताच्चाण् कूपाञो
पवादः रौणः आजकरौणः कोपधाच्च अण् अञोऽपवादः कार्णच्छिद्रकः कूपः का

सि॰
कौ॰
२५५

कैवाकवम् ऐषीकवम् वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठ
कोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसु
तङ्गमप्रगदिन्वराहकुमुदादिभ्यः सप्तदशभ्यः सप्तदश क्रमात्स्युः चतुरर्थ्याम् अरी
हणकम् कृशाश्वादिभ्यश्छण् कार्शाश्वीयम् ऋश्यादिभ्यः कः ऋश्यकम् कुमुदा
दिभ्यष्ठच् कुमुदिकम् काशादिभ्य इलः काशिलः तृणादिभ्यः सः तृणसम् प्रेक्षा
दिभ्य इनिः प्रेक्षी अश्मादिभ्यो रः अश्मरः सख्यादिभ्यो ढञ् साखेयम् संकाशादि

भ्योण्यः साकाश्यम् बलादिभ्यो यः बल्यम् पक्षादिभ्यः फक् पाक्षायणः पथः प

न्थश्च पान्थायनः कर्णादिभ्यः फिञ् कार्णायनिः सुतंगमादिभ्य इञ् सौतङ्गमि ः

प्रगद्यादिभ्यो ञ्यः प्रगदिन् प्रागद्यः वराहादिभ्यः कक् वाराहकः कुमुदादिभ्य

ष्ठक् कौमुदिकः जनपदे लुप् जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात् लुपि युक्तवद्व्य

क्तिवचने लुपि प्रकृतिवल्लिङ्गवचने स्तः पञ्चालानां निवासो जनपदः प

ञ्चालाः कुरवः अङ्गाः वङ्गाः कलिङ्गाः तदशिष्यं संज्ञाप्रमाणत्वात् युक्तवद्व

सि॰
कौ॰
२५८

नेन कर्तव्यं संज्ञाप्रमाणत्वात् लुब्योगाप्रख्यानात् लुबपि न कर्तव्यो ऽवयवार्थो-
ऽस्याप्रतीतेः योगप्रमाणे च तदभावेऽदर्शनं स्यात् यदि हि योगस्यावयवार्थस्येदं
बोधकं स्यात्तदा तदभावे न दृश्येत प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वा-
त् प्रत्ययार्थः प्रधानमित्येवंरूपं वचनमप्यशिष्यं कुतः अर्थस्य लोकत एव सि-
द्धेः कालोपसर्जने च तुल्यम् अतीताया रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन च
सहितो दिवसोऽद्यतनः विशेषणमुपसर्जनमित्यादिः पूर्वाचार्यैः परिभाषितम् २५९

तत्राप्यशिष्यत्वं समानं लोकप्रसिद्धेः विशेषणानां वाजातेः लुबर्थस्य विशे-
षणानामपि तद्वल्लिङ्गवचने भवतो जातिं वर्जयित्वा पञ्चाला रमणीयाः गोदौ
रमणीयौ अजातेः किं पञ्चाला जनपदाः गोदौ ग्रामः हरीतक्यादिषु व्यक्तिः ह-
रीतक्याः फलानि हरीतक्यः खलतिकादिषु वचनम् खलतिकस्य पर्वतस्याद्-
रभवानि खलतिकं वनानि मनुष्यलुपि प्रतिषेधः मनुष्यलुपो लुबर्थविशे-
षणानां न लुबर्थस्य भवतीत्यर्थः वञ्चा अभिरूपाः वरणादिभ्यश्च अजनपदा

सि. कौ. २५१

र्थ आरम्भः वरणानामदूरभवं नगरं वरणाः शर्कराया वा अस्माच्चातुरर्थिक

स्य वा लुप् स्यात् ठक्छौ च शर्कराया एतौ स्तः कुमुदादौ वराहादौ च पाठसामर्थ्या

त् पक्षे ठक्छकौ वाग्रहणसामर्थ्यान्मध्ये औत्सर्गिकोऽण् तस्य लुब्विकल्पः षड्रू

पाणि शर्करा शार्करं शार्करिकं शर्करीयम् शार्करिकम् शार्करकम् नद्यां

मतुप् चातुरर्थिकाः इत्वमती मध्वादिभ्यश्च कुमुदनडवेतसेभ्यो ड्मतुप् कुमु

द्वान् नड्वान् वेतस्वान् श्रापयोः कपश्इतिग्रन्थेऽस्माड्डपरायादिनिवत्समाणेन २५१

वः महिषाच्चेति वक्तव्यम् महिष्मान्नामदेशः नडशादाड्ड्वलच् नड्वलः शादो
जम्बालघासयोः शाद्वलः शिखाया वलच् शिखावलम् उत्करादिभ्यश्छः॥
उत्करीयः नडादीनांकुक्च नडकीयम् क्रौञ्चाह्रस्वत्वंच क्रुञ्चकीयः तक्षन्न
लोपश्च तक्षकीयः बिल्वकादिभ्यश्छस्यलुक् नडाद्यन्तर्गणाबिल्वकादयस्ते
भ्यश्छस्यलुक् तद्धितेपरे बिल्वायस्यांसन्तिसा बिल्वकीया तस्यांभवाबैल्वकाः
वेत्रकीयायांवेत्रकाः छस्यकिम् छमात्रस्यलुक् यथास्यात् कुकोनिवृत्तिर्माभूत्।

सि॰
कौ॰
२५८

त अन्यथा सन्नियोगशिष्टानामिति न्यायेन निवृत्तेन लुग्ग्रहणं सर्वलोपार्थं
लोपो हि यमात्रस्य स्यात् इति चातुरर्थिकः। शेषे। अपत्यादिचतुरर्थ्यन्तादन्यो
ऽर्थः शेषस्तत्राणादयः स्युः। चक्षुषा गृह्यते चाक्षुषं रूपं श्रावणः शब्दः। औप
निषदः पुरुषः। दृषदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्ण औलूखलो यावा
कः। अश्वैरुह्यते आश्वो रथः। चतुर्भिरुह्यते चातुरं शकटम्। चतुर्दश्यां
दृश्यते चातुर्दशं रक्षः। शेष इति लक्षणं चाधिकारश्च। तस्य विकार इत्यतः प्रा

कः शेषाधिकारः राष्ट्रावारपाराद्घखौ ग्राम्यात्कमाद्घखौ स्मः शेषे राष्ट्रियः अ
वारपारीणः अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् अवारीणः
पारीणः पारावारीणः इह प्रकृतिविशेषाद्घादयः सप्तसलन्ताः प्रत्यया उच्य
न्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ग्रामाद्यखञौ ग्रा
म्यः ग्रामीणः कत्र्यादिभ्यो ढकञ् कुत्सितास्त्रयः कत्त्रयः तत्र जातादिः कात्रे
ग्रामेयकः कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु कौलेयकः श्वा कौलोऽन्यः कौ

क्षेयकोसिः कौक्षोन्यः ग्रैवेयकोलङ्कारः ग्रैवोन्यः नद्यादिभ्यो ढक् नादेयं मा
हेयं वाराणसेयम् दक्षिणापश्चात्पुरसस्त्यक् दक्षिणा इत्याजन्तमव्ययम् दा
क्षिणात्यः पौरस्त्यः पाश्चात्यः कापिश्याः ष्फक् कापिश्यां जातादि कापिशा
यनं मधु कापिशायनी द्राक्षा रङ्कोरमनुष्येण्च राङ्कवो गौः राङ्कवायणः अ
मनुष्ये किं राङ्कवको मनुष्यः द्युप्रागपागुदक्प्रतीचो यत् दिव्यं प्राच्यं अपाच्यं उ
दीच्यं प्रतीच्यम् कन्थायाष्ठक् कान्थिकः वर्णौ वुक् नदीसमीपे देशो वर्णुः त

द्विषयार्थेवाविकल्पाशङ्कानवृक यथा द्विजातं द्विमवत्मकाम्यकम् अव्यया
मेप अमेरक्तमिश्रम्पणव अमान्निकमहार्थयोः अमानः इहतः कृतः तता
स्तः तत्रमः परिमाणे किं उपरिष्टाद्वर्डौ परिष्टः अव्ययानां भमात्रे टिलोपः अ
नित्यार्यं बहिषष्टिलोपविधानात् तेनेहन आरातीयः स्वभः भवेः भवेड् इति वक्त
व्यम् निम्नः निम्नोगाते ह्रस्वात्मादौ तद्धिते ह्रस्वादिणः परस्य सस्य षः स्यात् नादौ
तद्धिते निर्गतो वर्णाश्रमेभ्यः निष्टः वषडाल्लादिः अपरणामाः आरणपाः स्वमन

सि॰
कौ॰
२८

मः दूरादेत्यः दूरेत्यः उत्तरादाहञ् औत्तराहः ऐषमोह्यःश्वसोऽन्यतरस्याम् ऐषमस्त्
यब्वा पक्षे वक्ष्यमाणौ ट्युट्युलौ ऐषमस्त्यम् ऐषमस्तनम् ह्यस्त्यं ह्यस्तनं श्वस्त्यं श्व
स्तनं पक्षे शौवस्तिकं तीररूप्योत्तरपदादञ्ञौ यथासंख्येन काकतीरं पा
ल्वलतीरं शैवरूप्यम् तीररूप्यान्तादिति नोक्तम् बह्वच्पूर्वान्माभूत् बाहुरू
प्यम् दिक्पूर्वपदादसंज्ञायां ञः अणोऽपवादः पौर्वशालः असंज्ञायां किं संज्ञा
याः प्रकृतेर्माभूत् पूर्वेषुकामशम्यां भवः पौर्वेषुकामशमः प्राचां ग्रामनगरा

णामित्समर्थपदवृद्धिः मद्रेभ्योञ् दिक्पूर्वपदादित्येव दिशोमद्रः प्राच्यम

द्रः उदीच्यग्रामाच्च बह्वचोन्तोदात्तात् ग्रन्थमात् शैवपुरं प्रस्थोत्तरपदप

द्यादिकोपधादण् माहकिप्रस्थः पालदः नैलीनकः काण्वादिभ्योगोत्रे प

भ्योगोत्रप्रत्ययान्तेभ्यश्चाण्स्यात् काण्वागार्ग्यादिःकाण्वाः इञश्च गोत्रेयदञ्

न्तात्तस्मादण्स्यात् दाक्षाःगोत्रे किं सौतङ्गमेरिदं सौतङ्गमेयम् गोत्रमिहशा

स्त्रीयंनतुलौकिकम् तेनेहनपाणिनीयम् नद्व्यचःप्राच्यभरतेषु इञश्चेत्य

णेयवाहः प्राष्ठीयाः काशीयाः भरतानां प्राच्येषु ग्रहणादानमत्रश्रा
वग्रहणे भरतानामग्रहणमसिद्धम् वृद्धिर्यस्याचामादिस्तद्वृद्धम् यस्य स
मुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् त्यदादीनि च त्यदादीनि वृद्ध
संज्ञानि स्युः वृद्धाच्छः शालीयः मालीयः तदीयः एङ् प्राचां देशे एङ् यस्या
चामादिस्तद्वृद्धसंज्ञं वा स्यात् देशाभिधाने एणीपचनीयः ऐणीपचनः गो
नर्दीयः भोजकटीयः पद्धिं श्रादिक्कङ्कः कामऊब्बः वा नामधेयस्य वृद्धसं। २८।

तेनिवासम् देवदत्तीयः देवदत्तः भवतष्ठक्छसौ वृद्धाद्भवतः पटोस्यः भा

वत्कः भवदीयः जयन्तनदः वृद्धादित्यनुवृत्तेः पाचन्त्रादणेव भावतः का

श्यादिभ्यष्ठञ्ञिठौ इकार उच्चारणार्थः काशिकी काशिका वैदिकी वैदिका आ

पदादिपूर्वपदात्कालान्तात् आपदादिराकृतिगणः आपत्कालिकी आ

पत्कालिका वाहीकग्रामेभ्यश्च वाहीकग्रामवाचिभ्यो वृद्धेभ्यः ठञ् ञि

ठौ स्तः छस्यापवादः कास्तीरं नाम वाहीकग्रामः कास्तीरिकी कास्तीरिका

सि॰
कौ॰
२८१

विभाषोशीनरेषु एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यः ठञ्ञिठौ वा स्तः सौदा-
र्शनिकी सौदर्शनिका सौदर्शनीयः ओर्देशे ठञ् उवर्णान्ताद्देशवाचि-
नः ठञ् निषादकर्षूः नैषादकर्षुकः केणाइति ह्रस्वः देशे किं पटोश्छात्राः
पाटवाः दंजिव्यावर्तयितुं ठञ्ग्रहणं वृद्धाच्छं परत्वादयं बाधेत दाक्षि-
कर्षुकः वृद्धात्प्राचाम् प्राग्देशवाचिनो वृद्धादेवेति नियमार्थमिदम् आ-
ढकजम्बुकः शाकजम्बुकः नेह मल्लवास्तुः माल्लवास्तवः धन्वयोपधाद्वु

२८१

ञ् यन्नविशेषवाचिनो यकारोपधाश्च देशवाचिनः वृद्धाद्वुञस्मात् ऐषाव
तेयन्ना ऐषावतकः सांकाश्यकाम्पिल्यशब्दौ निबुल्छणादि सूत्रे ण्यणा
न्तौ सांकाश्यकः काम्पिल्यकः प्रस्थपुरवहान्ताच्च एतदन्ताद्वृद्धाद्देशवाचि
नो वुञस्मात् खमापवादः मालाप्रस्थकः नान्दीपुरकः पैलवहकः प्रस्थ
ग्रहणमप्रागर्थम् प्राग्देशार्थं नेरमासिद्धम् रोपधेतोः प्राचां रोपधादीकारा
न्ताच्च प्राग्देशवासिनो वृद्धाद्वुञस्मात् पाटलिपुत्रकः ऐनाकाकन्दकः ज

सि. कौ. २८२

नपदतदवध्योश्च जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ्स्यात् आद
र्शकः त्रैगर्त्तकः अवृद्धादपिबहुवचनविषयात् अवृद्धाद्वृद्धाच्चजनपद
तदवधिवाचिनोबहुवचनविषयात् प्रातिपदिकात् वुञ्स्यात् अवृद्धा
दपिवृद्धाच्छस्यापवादः अवृद्धाज्जनपदात् आङ्गकः अवृद्धाज्जनपदावधे :
आजमीढकः वृद्धाज्जनपदात् दार्वकः वृद्धाज्जनपदावधेः कालंजरक :
विषयग्रहणंकिं एकशेषेणबहुत्वेमाभूत् वर्तनीच २ वर्तन्यस्तासुभवोवा २८२

नेनाः कच्छाग्निवक्त्रवर्तोत्तरपदात् देशवाचिनो वृद्धाद्वृद्धाच्छ्वुञ् स्यात्
दारुकच्छकः काण्डाग्नकः सैन्धववक्त्रकः बाह्यवर्तकः धूमादिभ्यश्च दे
शवादिभ्यो वुञ् धौमकः तैर्थकः नगरात्कुत्सनप्रावीण्ययोः कुत्सिते प्रावी
ण्ये च जातादौ प्रत्ययार्थे नगरशब्दाद्वुञ् स्यात् नागरकश्चौरः शिल्पी वा एतयो ः
किम् नागरा ब्राह्मणाः अरण्यान्मनुष्ये वुञ् स्यात् आरण्यामनुष्याः अपवाद ः
पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम् आरण्यकः पन्थाः अध्या

योन्यायो विहारो मनुष्यो हस्ती वा वा गोमयेषु आरण्यका आरण्या गोमया ॥
विभाषाकुरुयुगन्धराभ्याम् वुञ् कौरवकः कौरवः यौगन्धरकः यौगन्धर ॥
मद्रवृज्योः कन् जनपदवुञोपवादः मद्रेषु जातो मद्रकः वृजिकः कोपधा
दण् माहिषकः कच्छादिभ्यश्च कच्छादिभ्यो देशवाचिभ्योण् वुञादेरपवा
दः काच्छः सैन्धवः मनुष्यतत्स्थयोर्वुञ् कच्छादिभ्यः अणोपवादः कच्छे
जातः काच्छको मनुष्यः काच्छकं हसितं मनुष्येति किं काच्छो गौः अपदा

तौ साल्वात् साल्वशब्दस्य कच्छादिपाठात्सिद्धे नियमार्थमिदम् अपदाता
वेवेति साल्वको व्रजति साल्वकं हसितं अपदातौ किम् साल्वः पदातिर्व्रज
ति गोयवाग्वोश्च साल्वाद्वुञ् कच्छाद्यणोपवादः साल्वको गौः साल्विकाय
वागूः साल्वको गौः साल्विकायवागूः साल्वमन्यत् गर्त्तोत्तरपदाच्छः देश इ
त्येव वृकगर्त्तीयं उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम् गहादिभ्यश्च गही
यः मुखपार्श्वतसोर्लोपश्च अव्ययानां भमात्रे टिलोपस्यानित्यत्वं ज्ञापयितुमि

सि॰
कौ॰
२६५

दम् भवतीयं पार्श्वतीयं ऊञ्जनस्य परस्य च जनकीयं परकीयं देवस्य च देव
कीयम् स्वस्य वा स्वकीयं स्वीयं वेणुकीयं वैत्रकीयं औत्तरपदकीयं शावांक
टादेः प्राग्देशवासिनः कटादेः छः स्यात् अणोपवादः कटघोषीयम् कटप
ल्वलीयम् राज्ञः क च राजकीयम् वृद्धाच्छमिदं तत्सन्नियोगेन कादेशमात्रं
विधीयते वृद्धादकेकान्तखोपधात् प्रकरकेसेवमन्तात्खोपधाच्च वृद्धाद्दे
शवासिनः छः स्यात् ब्राह्मणकोनाम जनपदः यत्र ब्राह्मणा आयुधजीविनः

तत्र जातो ब्राह्मणकीयः शाल्मलिकीयः अयोमुखीयम् कन्थापलदनगरग्रा
मह्रदोत्तरपदात् कन्थादिपञ्चकोत्तरपदाद्देशवाचिनो वृद्धाच्छः ठञ्ञिठादेरपा
वादः दाक्षिकन्थीयं दाक्षिपलदीयं दाक्षिनगरीयं दाक्षिग्रामीयं दाक्षिह्रदीयम्
पर्वताच्च पर्वतीयः मनुष्यः विभाषा मनुष्ये मनुष्यभिन्नेर्थे पर्वताच्छो वा स्यात् प
क्षेण पर्वतीयानि पर्वतानि वा फलानि कृकणपर्णाद्भारद्वाजे भारद्वाजदेशवा
चिभ्यामाभ्यां छः कृकणीयं पर्णीयं भारद्वाजे इति किम् कार्कणं पार्णम् युष्मदस्म

सि॰
कौ॰
१९९

दोरन्यतरस्यांखञ्च चाच्छःपक्षेण युवयोः युष्माकंवायंयुष्मदीयः अस्मदीयः तस्मि
न्नणिचयुष्माकास्माकौ युष्मदस्मदोरेतावादेशौ स्तःखञि अणिचपरे यौष्माकी
णः अस्माकीनः यौष्माकः आस्माकः तवकममकावेकवचने एकार्थवाचिनो
र्युष्मदस्मदोस्तवकममकौस्तःखञिअणिच तावकीनः तावकः मामकीनः मा
मकः छेतु प्रत्ययोत्तरपदयोश्च मपर्यन्तयोरेतयोरेकार्थयोस्त्वमौस्तः प्रत्ययेउ
त्तरपदेच त्वदीयः मदीयः अर्धाद्यत् अर्ध्यः परावराधमोत्तमपूर्वाच्च परार्ध्यम् अव

रार्द्ध्यम् अधमार्द्ध्यम् उत्तमार्द्ध्यम् दिक्पूर्वपदाट्ठञ्च वार्द्ध्यम् पौर्वार्द्धिकम् पौर्वार्द्ध्य
म् ग्रामजनपदैकदेशादञ्ठञौ ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दि
क्पूर्वपदादर्द्धान्तमादञ्ठञौ स्तः इमेऽस्माकं ग्रामस्य जनपदस्य वा पौर्वार्द्धिकाः ग्रा
मस्य पूर्वस्मिन्नर्द्धे भवा इति तद्धितार्थे समासः दञ्ज्ञुह्रांसमश्चार्थे अच्छेसञ्ज्ञेयवो।
प्नुकर्षाः समाधेयाः मध्यान्मः मध्यमम् अ सांप्रतिके मध्यशब्दादकारप्रत्यय :
स्यात् सांप्रतिकेऽर्थे उत्कर्षापकर्षहीनो मध्यो वैयाकरणः मध्यं दारु नातिह्रस्वं

सि॰
कौ॰
२८०

नातिदीर्घमित्यर्थः द्वीपादनुसमुद्रंयञ् समुद्रसमीपेयोद्वीपस्तद्विषयाद्वीप।
शब्दाद्यञ् द्वैप्यं द्वैप्या कालाट्ठञ् कालवाचिभ्यष्ठञ्स्यात् मासिकं सांवत्सरिकं
सायंप्रातिकः पौनःपुनिकः कथंतर्हि शार्वरस्यतमसोनिषिद्धयेतिकालिदा
सः श्रुतदितैव सरागोतिभारविः समानकालीनंप्राक्कालीनमित्यादि च अपश
ब्दा एवेति प्रामाणिकाः तत्रजातइतियावत्कालाधिकारः श्राद्धेशरदःठञ्
स्यात् ऋत्वणोपवादः शारदिकंश्राद्धम् विभाषारोगातपयोः शारदिकः शार।

दौवारिगः आतपोवातपतयोः किं शारदंदधि निशाप्रदोषाभ्यांच वाह्रस्वात्।
नैशिकं नैशं प्रादोषिकं प्रादोषम् श्वस्तस्तुद्ध श्वस् शाद्वात् ठञ्चवास्मात् तस्मात्
डागमश्च द्वारादीनांच द्वारस्वरव्यल्कशास्वलि स्वर् स्फ कृतस्वाडाम्बृह्मश्वस् स्वत्
स्वपचानहृदिः ऐजागमश्च शौवस्तिकं सन्धिवेलाद्यृतुनक्षत्रेभ्योण् सन्धिवेला
दिभ्यः ऋतुभ्योनक्षत्रेभ्यश्च कालवृत्तिभ्योणस्मात् सन्धिवेलायांभवं सान्धिवे।
लम् ग्रैष्मं तैष्यं सन्धिवेला सन्ध्या अमावस्या त्रयोदशी चतुर्दशी पंचदशी पौ

सि॰
कौ॰
२९८

र्णमासी प्रतिपत् इत्यादि संवत्सरात्फलपर्वणोः संवत्सरं फलं पर्व वा सांवत्सरि
कमन्यत् प्रावृष एण्यः प्रावृषेण्यः वर्षाभ्यष्ठक् वर्षासु साधुर्वार्षिकः वासः का
लात्साधुपुष्प्यत्पच्यमानेष्विति साध्वर्थे सर्वत्राण्च तलोपश्च हेमन्तादण्स्यात्।
तलोपश्च वेदलोकयोः चकाराट्ठञ् हैमनं हैमन्तं सायंचिरंप्राह्णेप्र
गेऽव्ययेभ्यष्ट्युट्युलौ तुट्च सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्यु
ट्युलौ स्तस्तयोस्तुट्च युवोरनादेशः अनद्यतने इत्यादि निर्देशात् सायंतनं वि

रेतनं प्राह्णप्रगयोरेदन्तत्वं निपात्यते प्राह्णेतनं प्रगेतनं दोषातनं दिवात
लेपील्वादिकर्णादिभ्यःकुणजाहचौ यथासंख्यंपीलूनांपाकःपीलुकुणःकर्क

न्यऊणः कर्णास्यमूलं कर्णाजातेः प्रतिजातस्य पील कर्कन्धु शमी करीर ऊवलव
दिरश्रश्वत्थखदिरपील्वादिः कर्ण प्रतिनाव मावकेश पाद गुल्कभद्रकर्णादिः प
तातिः मूलग्रहणमनुवर्तनेनपाकग्रहणं एकयोगनिर्दिष्टानामप्येकदेशा
नुवृत्तिर्भवति पलसमूलंपलातिः नेनविनत्रुफलपौ यकारःप्रत्यययोरादौलभ
निर्दिष्टः तेनचस्मनेन्संज्ञा विधयाविज्ञः विद्याबन्धुः केपाचणाः विनन्यंनाना
यौनमह नमहेस्तिप्रकृतिविशेषणं प्रमहार्थे एय गभावेवर्तमानाभ्यांविनञ्भ्यां

यथासंख्यंस्वार्थे नानाञौप्रत्ययौभवतः विनाभ्नाना वेःशालच्छङ्कटचौ क्रिया
विशिष्टमात्रवाचकाद्विशब्दात् स्वार्थेविस्तृतेविशालंविशंकटम् संप्रोदश्चक
टच् संकटम् प्रकटं विकटं उत्कटं अलाबूतिलोमाभङ्गाभ्योरजस्युपसंख्यानम् अ
लाबूनांरजः अलाबूकटं तिलकटं उमाकटं भङ्गाकटम् गोष्ठजादयःस्थाना
दिषुपशुनामभ्यः गवांस्थानंगोगोष्ठं अश्वगोष्ठं महिषीगोष्ठं संघातेकटच्प
टच् अविपटः द्वित्वेगोयुगच् द्वौउष्ट्रौउष्ट्रगोयुगम् षट्त्वेषड्गवच् अश्वषड्गवम्

सि॰
कौ॰
३२३

हस्तिषड्गवम् स्नेहे तैलच् तिलतैलं सर्षपतैलम् भवने क्षेत्रे शाकटशाकिनौ ॥
इक्षुशाकटं इक्षुशाकिनम् अवात्कुटारच्च चात्कटच् अवकुटारः अवक
टः नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः अवादित्येव नतं नमनं
नासिकाया नतं अवटीटं अवनाटं अवभ्रटं तद्योगान्नासिका अवटीटा पुरु
षोऽवटीटः नेर्बिडज्बिरीसचौ निबिडं निबिरीसं इनच्पिटच्चिकचि च नेरित्ये
व नासिकाया नतेऽभिधेये इनच्पिटच्प्रत्ययौ प्रकृतेः कप्रत्ययचिकादेशौ च

ऋचौ चिक चि इत्येतावादेशौ चिकिनं चिपिटं चिक्कं तद्योगान्नासिकया चि
किनः चिपिटः चिक्कः क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी क्लिन्ने चक्षुषी अस्य चि
ल्लः पिल्लः चुल्ल च चुल्लः उपाधिभ्यां त्यकन्नासन्नारूढयोः संज्ञायामित्यनुवर्त
ते पर्वतस्यासन्नस्थलं उपत्यका तस्यैव आरूढं स्थलं अधित्यका कर्मणि घ
टोऽठच् कर्मशब्दात्सप्तमीसमर्थात् घटइत्यस्मिन्नर्थे अठच्प्रत्ययो भवति।
घटतइति घटः कर्मणि घटते कर्मठः पुरुषः तदस्य सञ्जातं तारकादिभ्य

सि॰
कौ॰
३२५

तच् तारकाः संजाता अस्य तारकितं नभः आकृतिगणोऽयम् प्रमाणे द्वयसज्दघ्नञ्मात्रचः तदस्येत्यनुवर्त्तते ऊरु प्रमाणमस्य ऊरुद्वयसं ऊरुदघ्नं ऊरुमात्रं जानुद्वयसम् जानुदघ्नं जानुमात्रम् प्रमाणे लः प्रमाणशब्दाद्विहितात्प्रत्ययस्य लुग्भवति शमः प्रमाणमस्य शमः दिष्टिः वितस्तिः द्विगोर्नित्यम् द्वौ शमौ प्रमाणमस्य द्विशमम् प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रच् वक्तव्यः शममात्रं प्रस्थमात्रं पञ्चमात्राः दशमात्राः वत्वन्तात्स्वार्थे

द्वयसंमात्रचौ तावद्द्वयसं तावन्मात्रम् यावद्द्वयसं यावन्मात्रं पुरुषहस्ति।

भ्यामण्च तदेषमनुवर्त्तते प्रमाणइतिच चकाराद्द्वयसज्जादयश्च पुरुषः

प्रमाणमस्यपौरुषंपुरुषद्वयसम् पुरुषदघ्नम् पुरुषमात्रम् हास्तिनम् ह

स्तिद्वयसम् हस्तिदघ्नम् हस्तिमात्रम् द्विगोर्नित्यंलुक् द्विपुरुषमुदकम्

द्विहस्ति त्रिहस्ति द्विपुरुषीगङ्गा त्रिपुरुषी द्विहस्तिनी त्रिहस्तिनी यत्तदे

तेभ्यः परिमाणेवतुप् यत्परिमाणमस्ययावान् तावान् एतावान् किमिदंभ्यां

बोध्यः आम्भावतस्मात् वस्यघः कियान् इयान् किमः संख्यापरिमाणे डः।
ति च चाद्वतुप् तस्य च वस्य घः स्यात् का संख्या येषां ते कति कियन्तः संख्याया
अवयवे तयप् पञ्चावयवा यस्य पञ्चतयम् दशतयम् चतुष्टयी रज्जुः द्वि
त्रिभ्यां तयस्यायज्वा द्वयं द्वितयं त्रयं त्रितयं उभादुदात्तो नित्यम् उभशब्दा
त्तयपः अयच् स्यात् स चाद्युदात्तः उभयम् तदस्मिन्नधिकमिति दशान्ताड्ड :
एकादशाधिका अस्मिन्छते एकादशं शतं एकादशं सहस्रम् द्वादशं च

षोडशं शतसहस्रयोरेवेष्यते एकादशाधिकाअस्मिन्विंशतं प्रकृतिप्र

त्ययार्थयोः समानजातीयत्वएवेष्यते तेनएकादशमाषाः अधिकमस्मि

न्कार्षापणे शतेन्विंशतेश्च डःस्यात् उक्तेर्थे त्रिंशदधिका अस्मिञ्छते त्रिं

शंशतम् विंशंशतम् संख्यायागुणस्यनिमानेमयट् भागमूल्येवर्तमाना

त्संख्यावाचिनःषष्ठ्यर्थेमयट्स्यात् यवानांद्वौभागौनिमानमस्योदश्विद्भा

गस्यद्विमयमुदश्विद्यवानाम् गुणस्येतिकिम् द्वौव्रीहियवौनिमानमस्यो

योदशांशात्मकस्रयोरेवेष्यते एकादशाग्रधिकाग्रसंख्याविंशांशाः प्रकृतिप्र

त्ययार्थयोः समानजातीयत्वमेष्यते तेनैकादशमाषाः अधिकमस्मि

न्द्वर्णमाने षोडशविंशांतेश्च ऽस्मात् उक्तेऽर्थे त्रिंशदधिका अस्मिन्स्राते त्रिं

शेषानाम् विंशांशानाम् संख्यायागुणस्य निमानेमयट् भागम्लेवर्तमाना।

त्संख्यावाचिनःषष्ठ्यर्थेमयट्स्मात् यवानांद्वौभागौनिमानमस्योदविंशा

गस्य द्विमयमुदश्वियवानाम् गुणस्येतिकिम् द्वौव्रीहियवौनिमानमस्य

दश्विनः निमाने किं द्वौ गुणौ क्षीरस्यैकस्तैलस्य द्विगुणं तैलं पच्यते क्षीरम
तस्य पूरणे डट् एकादशानां पूरणः एकादशः नान्तादसंख्यादेर्मट् डटो म
डागमः स्यात् पञ्चानां पूरणः पञ्चमः नान्तात्किं विंशः असंख्यादेः किं एका
दशः षट्कतिकतिपयचतुरां थुक् एषां थुगागमः स्यात् डटि षण्णां पूरणः
षष्ठः कतिथः कतिपयशब्दस्यासंख्यात्वेप्यत एव ज्ञापकात् डट् कतिपय
थः चतुर्थः चतुरश्छयतावाद्यक्षरलोपश्च तुरीयः तुर्यः बहुपूगगणसङ्घ

स्रतिथुक् इटीत्येव एतस्माद्व्योरसंख्यावेष्यतएवइड् बहुतिथइत्यादि व
तोस्तिथुक् इटीत्येव यावतां पूरणः यावतिथः तावतिथः द्वेस्तीयः इटोप
वादः द्वयोः पूरणः द्वितीयः त्रेः संप्रसारणं च तृतीयः इकुद्धलइतिसंप्रसार
णस्य दीर्घो न भवति द्वितीयतृतीयइतिनिर्देशात् विंशत्यादिभ्यस्तमडन्य
तरस्याम् एभ्यो इट् तमडादेशो वा स्यात् विंशतितमः विंशः एकविंशति
तमः एकविंशः त्रिंशत्तमः त्रिंशः एकत्रिंशत्तमः एकत्रिंशः नित्यं शतादिमा

सि॰ कौ॰ ३२०

सार्धमाससंवत्सराच्च शतस्य पूरणः शततमः एकशततमः मासादेरनरए
वडट् मासतमः षष्ट्यादेश्चासंख्यादेः षष्टेः पूरणः षष्टितमः सप्ततितमः अ
शीतितमः नवतितमः असंख्यादेरिति किं एकषष्टः एकषष्टितमः मतौ छ
सूक्तसाम्नोः मत्वर्थे छः स्यात् अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्त
म् एवं वारवन्तीयं साम अध्यायानुवाकयोर्लुक् मत्वर्थस्य छस्यात एवतत्प
कारच्छः विधानसामर्थ्याच्छात्वल्लुक् गर्दभाण्डः गर्दभाण्डीयः विमुक्ता

दिभ्योण् मत्वर्थेण् स्यात् अध्यायानुवाकयोः विमुक्तशब्दोस्मिन्नस्तीति वैमुक्तः दै
वासुरः गोषदादिभ्यो वुन् मत्वर्थे अध्यायानुवाकयोः गोषदकः इषत्वकः मा
तरिश्वक इति दिक् तत्र कुशलः पथः वुन् स्यात् पथि कुशलः पथकः आकर्षा
दिभ्यः कन् आकर्षे कुशलः आकर्षकः आकषादिभ्य इति रेफरहितो मुख्यः पाठः
आकर्षो निकषः धनहिरण्यात् कामे कामः इच्छा धने कामो धनकः देवदत्तस्य
हिरण्यको देवदत्तस्य स्वाङ्गेभ्यः प्रसिते प्रसितः प्रसक्तः तत्परः इत्यर्थः केशेषु प्र

सि॰
कौ॰
३२८

मितः केवलकः तद्ववनार्थानन्तरइत्यर्थः उदराट्ठगाद्यूने अविजिगीषोठक्स्या
त् कनोपवादः बुभुक्षयात्यन्तपीडिते उदरेप्रसितः औदरिकः आद्यूनेकिम् उ
दरकः उदरपरिमार्जनादौप्रसक्तइत्यर्थः सस्येनपरिजातः कन् स्यर्थेते नन्त
वक सस्यशब्दोगुणवाची शस्येनेतिपाठान्तरं शस्येनगुणेनपरिजातः सस्वा
हः शस्यकः साधुः अंशंहारी हारीत्यावश्यकेणिनिः अतएवयोगेषष्ठीन अं
शंहारी अंशकोदायादः तन्त्रादचिरापहृते तन्त्रकः पटः प्रत्यग्रइत्यर्थः तन्त्रक ः

शावारः ब्राह्मणकोष्णिके संज्ञायाम् आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्रा
ह्मणकः अल्पमन्नं यस्याः सा उष्णिका यवागूः अन्नपाह्वस्य उष्णादेशो निपात्य
ते शीतोष्णाभ्यां कारिणि शीतं करोतीति शीतकः अलसः शीघ्रकारी दक्ष इत्य
र्थः अधिकम् अध्यारूढशब्दात्कन्नुत्तरपदलोपश्च अधिकम् द्रोणः खार्याः अधि
काखारी द्रोणेन अनुकाभिकाभीकः कमिता एते निपात्यन्ते कमितर्यभि
धेये अन्वभिभ्यां कन् अभेः पाक्षिको दीर्घश्च अनुकामयते अनुकः अभिकः।

सि॰
कौ॰
३२९

मथतेश्चमिकः श्रमीकः पार्श्वेनान्विच्छति अनृजुरुपायः पार्श्वं तेनान्विच्छति
पार्श्वकः अयःशूलदण्डाजिनाभ्यां ठक्ठञौ तीक्ष्णउपायः अयःशूलं तेनान्वि
च्छति आयःशूलिकः साहसिकः दण्डाजिनं दम्भः तेनान्विच्छति दाण्डाजि
निकः दाम्भिक इत्यर्थः तावतिथं ग्रहणमिति लुग्वा कन्स्यात् पूरणप्रत्यय
स्य च वा लुक् द्वितीयकं द्विकं तृतीयकं चतुर्थकं चतुष्कं वा ग्रहणं देवदत्तेन
द्वितीयेन रूपेण ग्रहणमित्यर्थः तावतिथेन गृह्णातीति कन्वक्तव्यः नित्यं

वल्क षेद्धेनरूपेणगृह्णातिषद्धोदेवदत्तः षद्धकः सणंग्रामणीः देवदत्तो
मुख्योयेषांतेदेवदत्तकाः नकाः मकाः शाड्वलमस्यवन्यनंकरभे शांवला
लकाः करभः उष्ट्राणांबालकाः करभः उत्कउन्मनाः उद्गतमनस्कइत्येकप्रुत्वहा
न्नार्थेकः उत्कः उत्कण्ठितः कालप्रयोजनाद्रोगे कालप्रयोजनवशात्स्वकत्व
स्मात् रोगे द्वितीयेद्विभवोद्वितीयकोज्वरः प्रयोजनंकारणंरोगस्यफलंवा वि
षपुष्पैर्जनितोविषपुष्पकः उष्णंकार्यमस्यउष्णकः शीतकोज्वरः रोगेकिम्॥

सि॰
कौ॰
३३०

द्वितीयोदिवसोस्य तदस्मिन्नन्नंप्राये संज्ञायाम् प्रथमान्तात्सप्तम्यर्थेकन्स्यात्
यत्प्रथमान्तमन्नंचेत्प्रायविषयंतत् गुडापूपाः प्रायेणान्नमस्यांगुडापूपिकापौर्ण
मासी वटकेभ्यइनिर्वक्तव्यः वटकिनी कुल्माषादञ् कुल्माषाः प्रायेणान्नम
स्यांकौल्माषीपौर्णमासी श्रोत्रियंश्छन्दोधीते श्रोत्रियन्निति निपात्यते छन्दो
धीतेइत्यस्मिन्नर्थे श्रोत्रियोब्राह्मणः नकारः स्वरार्थः वातृजेच्छान्दसः श्राद्ध
मनेनभुक्तमिनिठनौम श्राद्धमनेनभुक्तमित्यस्मिन्नर्थे श्राद्धीश्राद्धिकः पूर्वादिनिः

वैशाखाटेनेनेमस्मिन्नर्थे इनिः पूर्वं गतमनेन भुक्तं पीतं वा पूर्वी सपूर्वाच्च कृतं पू-
र्वमनेन कृतपूर्वी कटम् भुक्तपूर्वी ओदनम् इष्टादिभ्यः इनिः इष्टमनेन इष्टी श्रु-
ती सञ्जी उपवासी छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि लोके तु परिप-
न्थिशब्दो नाम्नायः अनुपद्यन्वेष्टा अनुपदमन्वेष्टा अनुपदी साक्षाद्द्रष्टरि संज्ञाया-
म् साक्षाद्द्रष्टा साक्षी क्षेत्रियच्परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः शरीरान्तरे चि-
कित्स्यः प्रतीकार्यः इत्यर्थः इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्र

सि॰
कौ॰
३३१

दत्तमितिवा इन्द्रआत्मा तस्य लिङ्गं करणेन कर्तुरनुमानादिति करणः प्रकारा
र्थः इन्द्रेण दुर्जयमिन्द्रियम् तदस्यास्त्यस्मिन्निति मतुप् गावोस्यास्मिन्वा सन्ति
गोमान् भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने संसर्गेस्ति विवक्षायां भवन्ति
मतुबादयः रसादिभ्यश्च मतुप् रसवान् रूपवान् अन्यमत्वर्थीयनिवृत्त्यर्थं वचनं
रसरूपवर्णगन्धस्पर्शशब्दस्नेहगुणात् एकाचश्च स्ववान् गुणग्रहणं रसादीनां
विशेषणम् तसौ मत्वर्थे तान्तसान्तौ भसंज्ञौ स्तः मत्वर्थे प्रत्यये परे स्वसोः संप्रसार

णाम् विदुष्मान् गुणवचनेभ्यो मतुपो लुगिष्टः शुक्लो गुणोऽस्यास्तीति शुक्लः पटः कृ
ष्णः मादुपधायाश्च मतोर्वोऽयवादिभ्यः मवर्णावर्णान्तात् मवर्णावर्णोपधाश्च यवा
दिवर्जितात्परस्य मतोर्मस्य वः स्यात् किंवान् ज्ञानवान् विद्यावान् लक्ष्मीवान् यश
स्वान् भास्वान् यवादेस्तु यवमान् भूमिमान् झयः झयन्तात् मतोर्मस्य वः स्यात् मरुत
त्वान्नग्निचित्वान् विद्युत्वान् संज्ञायाम् मतोर्मस्य वः अहीवती मुनीवती इत्यादिना
दीर्घः आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती एते संज्ञायां निपात्याः

सि॰
कौ॰
३३२

न्ते आसनशब्दस्य आसन्दीभावः आसन्दीवान्ग्रामः अन्यत्र आसनवान् अस्थिश
ब्दस्य अष्ठीभावः अष्ठीवान् अस्थिवानन्यत्र चक्रशब्दस्य चक्रीभावः चक्रीवान्नाम
राजा चक्रवानन्यत्र कक्ष्यायाः संप्रसारणं कक्षीवान्नाम ऋषिः कक्ष्यावानन्यत्र ल
वणशब्दस्य रुमण्वद्भावः रुमण्वान्नाम पर्वतः लवणवानन्यत्र चर्मणो नलोपाभा
वो णत्वं च चर्मण्वती नाम नदी चर्मवानन्यत्र उदन्वानुदधौ च उदकस्योदन्भावो
मतौ उदधौ संज्ञायां च उदन्वान्समुद्रः ऋषिश्च राजन्वान्सौराज्ये राजन्वती भूः राज

वानत्र प्राणिस्थादातो लजन्यतरस्याम् चूडालः प्राणिस्थात्किं शिखावान्दी
पः आतः किं हस्तवान् प्राण्यङ्गादेव नेह मेधावान् प्रत्ययस्वरेणैव सिद्धे अन्तो
दात्तेनचूडालोसीत्यादौस्वरितोवानुदात्तेपदादावितिस्वरितबाधनार्थंचका
रः सिध्मादिभ्यश्च लजन्यतरस्याम् सिध्मलः सिध्मवान् अन्यतरस्यांग्रहणंमतुपसमुच्च
यार्थं नतुप्रत्ययविकल्पार्थम् तेनाकारान्तेभ्य इनिठनौ न वातदन्तबलललाटा
नामूङ्च वातूलःदन्तूलः बलूलः ललाटूलः वत्सांसाभ्यांकामबले भ्याम् ल

ह्यस्मात् यथासंख्यं कामवति बलवति चार्थे वत्सलः अंसलः फेनादिलच्च वा
च अप्रमत्तरर्थग्रहणं मतुपश्च यथार्थमनुवर्तते फेनिलः फेनलः फेनवान् लोमा
पिच्छादिभ्यः शनेलचः लोमादिभ्यः शः लोमशः लोमवान् पामादिभ्यो नः पाम
नः अङ्गात्कल्याणे अङ्गना लक्ष्म्या अच्च लक्ष्मणः विषुगित्युत्तरपदलोपश्चाकृतस
न्धेः विषुणः पिच्छादिभ्य इलच् पिच्छिलः पिच्छवान् उरसिलः उरस्वान् प्रज्ञाश्रद्धा
र्चावृत्तिभ्यो णः प्राज्ञो व्याकरणे प्राज्ञा श्राद्धः आर्चः वार्त्तः तपःसहस्राभ्यां यि।

नीनी विनीयोरिकारो नकारपरिज्ञानार्थः तपस्वी सहस्री असन्तत्वा ददन्तत्वा
श्च सिद्धे पुनर्वचनमण्बाधा मा भूदिति सहस्रान्तठनोपि बाधनार्थं अण्च यो
गविभाग उत्तरार्थः तापसः साहस्रः ज्योत्स्नादिभ्य उपसंख्यानम् ज्योत्स्नः तामि
स्रः सिकताशर्कराभ्यां च सैकतो घटः शार्करः देशे लुबिलचौ च चादण् मतुश्च
सिकतावान् एवं शर्करा दन्त उन्नत उरच् उन्नता दन्ताः सन्त्यस्य सुषिरः मुष्कोरः :
मुष्करः पशुः मधु माधुर्यं मधुरः रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् ख

सि॰ कौ॰
३३५

रः मुखरः नखरः कुञ्जो हस्तिहनुः कुञ्जरः नगपांसुपाण्डुभ्यश्च नगरम् पाण्डुरः
पांसुरः पाण्डरशब्दस्त्वव्युत्पन्न एव कच्छ्वा ह्रस्वत्वं च कच्छुरः द्युद्रुभ्यां मः द्युमः द्रुमः
रूढिशब्दावेतौ केशाद्वोऽन्यतरस्याम् प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे वग्रहण
ग्रहणमिनिठनोः समावेशार्थम् केशवः केशवान् अन्येभ्योऽपि दृश्यते मणिवः ना
गविशेषः हिरण्यवो निधिविशेषः राजीवः अर्णसो लोपश्च अर्णवः गाण्ड्यजगा
त्संज्ञायाम् ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः गाण्डिवं गाण्डीवम् अर्जुनधनुः॥

जगवंपिनाकः काण्डशाण्मदीरनीरवौ काण्डीरः शाण्डीरः रजाकृष्णाखविप
रिषदोवल्लच्च रजस्वलास्त्री हर्षीवलः ऊद्दम्बी वलदिनिदीर्यवम् श्रासनीव
लःराजा शौल्किकःपरिषद्बलःराजा पर्षदितिपाठान्तरं पर्षद्बलःराजा श्रेय
भ्योपिट्टश्पेन भ्रात्ववलः प्रज्ञवलः वलद्मत्रमंस्तायामिमन्नुह्मेनेहृदीर्यः द
न्तशिवान्संस्तायाम दन्तावलोहस्ती शिखावलःकेकी ज्योत्स्नानमिस्राश्च
ढ्रिःणोर्जेमित्रजेस्वलगोमिन्सलिनमलीमसाः मर्वर्षेनिपामन्ने ज्योतिश्चउप

थालोपोनश्च प्रत्ययः ज्योत्स्नाचन्द्रप्रभा तमसउपधायाइत्वंरश्च तमिस्रारा
त्रिः स्त्रीत्वमतन्त्रम् तमिस्रंनभः शृंगादिनच् शृङ्गिणः ऊर्जसोवलच् नेनबाधा
माभूदितिविनिरपि ऊर्जस्वी ऊर्जस्वलः ऊर्जोसु``गमइति वृत्तिस्तुचिन्त्याऊर्ज
स्वतीतिवदस्वन्तत्वेनैवोपपत्तेः गोषदाद्मिनिः गोमी मलशब्दादिनच् मलि
नः ईमसश्च मलीमसः अतइनिठनौ दण्डी दण्डिकः छत्री छत्रिकः व्रीह्यादि
भ्यश्च व्रीही व्रीहिकः व्रीहिमान् मायी मायिकः मायावान् तुन्दादिभ्यइ

लश्च चकाराट्ठिनिठनौ मतुप् च तुन्दिलः तुन्दी तुन्दिकः तुन्दवान् उदरिलः उद-
री उदरिकः उदरवान् तुन्द उदर पिचण्ड यव व्रीहि स्वाङ्गाद्विवृद्धौ स्वाङ्गवा च-
काच्छब्दादिलच्प्रत्ययो भवति विवृद्धौ वाच्यायां महान्तौ कर्णौ कर्णिलः कर्णी क-
र्णिकः कर्णवान् एकगोपूर्वाट्ठञ् नित्यम् एकशतमस्यास्ति ऐकशतिकः ऐक-
सहस्रिकः गौशतिकः गौसहस्रिकः शतसहस्रान्ताच्च निष्कात् निष्कात्परो
यौ शतसहस्रौ तदन्तात्प्रातिपदिकात् ठञ् स्यात् मत्वर्थे नैष्कशतिकः नैष्कसह-

स्तिकः रूपादाहतप्रशंसयोर्यप् आहतं रूपमस्यास्तीति रूप्यो कार्षापणः रू

प्यः केदारः प्रशस्तं रूपमस्यास्तीति रूप्यो गौः रूप्यः पुरुषः आहतप्रशंसयोरि

तिकिम् रूपवान् अन्येभ्योपि दृश्यते हिम्याः पर्वताः गुण्या ब्राह्मणाः अस्माया

मेधास्रजोविनिः असन्त्वात्प्रातिपदिकान्मायादिभ्यश्च मत्वर्थे विनिप्रत्ययः म

तुप्सर्वेत्र समुच्चीयते यशस्वी यशस्वान् मायावी मायावान् व्रीह्यादिपाठादि

निठनौ मायी मायिकः मेधावी क्विन्नन्ताच्छः स्रग्वी आमयस्योपसंख्यानं दी

येश्च सामयावी शृङ्गवृन्दाभ्यामारकन् शृङ्गारकः वृन्दारकः फलबर्हाभ्यामि
नच् फलिनः बर्हिणः हृदयाच्चालुरन्यतरस्याम् हृदयालुः हृदयी हृदयिकः
हृदयवान् शीतोष्णतृप्रेभ्यस्तदसहने शीतं न सहते शीतालुः उष्णालुः स्फायितं
चीतिरक् तृप्रः पुरोडाशः तं न सहते तृप्रालुः तृप्रं दुःखमिति माधवः हिमाच्चे
लुः हिमं न सहते हिमेलुः बलादूलः बलं न सहते बलूलः वातात्समूहे च न
सहत इति च वातं न सहते वातूलः वातानां समूहो वा तप्पर्वमरुद्भ्याम् पर्वतः म

सि॰
कौ॰
३३२

रुग्मः ऊर्णाया युस् सिध्मामदतं ऊर्णायुः अवज्ञदमीति केचिदन्ववर्णयन्ति पुंस्त्वे

चैतन्न अन्यथा हि अहंशुभमोर्युस् मैवं वाणीशहृणां ऊर्यात् वाचो ग्मिनिः वाग्ग्मी आ

लजाटचौ बहुभाषिणि कुत्सित इति वक्तव्यम् कुत्सितं बहुभाषते वाचालः वाचा

टः यस्तु सम्यग्बहु वदति तत्र वाग्ग्मी एव स्वामिन्नैश्वर्ये ऐश्वर्यवाचकात् स्वशब्दात्॥

मत्वर्थे आमिनिच् स्वामी अर्शआदिभ्योऽच् अर्शांसि विद्यन्ते अस्य अर्शसः उरसः आ

कृतिगणोऽयम् द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः द्वन्द्वः कटकवलयिनी शंखनू

पुरिणी उपतापोरोगः कुष्ठी किलासी गंद्ये निन्द्यंकक्रदावज्री काकनालुकी
प्राणिस्यात्किम् पुष्पफलवान्वटः प्राणपङ्गात्रपाणिपादवती सिंहप्रमयेपु
नर्वेवनंनादिवाधनार्थेम् वातातीसाराभ्यांऊक्त वादिनिः वातकी अतिसार
की रोगेवायमिष्यते नेहवातवतीगुदा पिपासावास्त्र पिशाचकी वैश्रवणः पि
यस्मरणात् स्मरणप्रमयान्नात्मवर्षे इनिःस्मात् वयमिष्टोमे मासःसंवत्स
रोवापंचमोस्यात्मीतिपंचमीउक्तः नवमी दशमी दत्तापनार्थेमिदम् वयमिकिं

सि॰
कौ॰
३३८

पद्मवान्ग्रामः सुखादिभ्यश्च इनिर्मत्वर्थे सुखी दुःखी मालाक्षेपे माली ध
र्मशीलवर्णान्तात् धर्माद्यन्तादिनिर्मत्वर्थे ब्राह्मणधर्मी ब्राह्मणशीली ब्राह्म
णवर्णी हस्ताज्जातौ हस्ती जातौ किं हस्तवान्पुरुषः वर्णाद्ब्रह्मचारिणि वर्णी ।
पुष्करादिभ्यो देशे पुष्करिणी पद्मिनी देशे किं पुष्करवान् हस्ती बाहूरुपूर्वप
दाद्बलात् बाहुबली ऊरुबली सर्वादेश्च सर्वधनी सर्वबीजी अर्थाच्चासन्नि
हिते असन्निहितो निस्समनासन्नः अर्थी संनिहिते न अर्थवान् तदन्ताच्चेति व

क्रम् धान्यार्थी हिरण्यार्थी बलादिभ्योमतबन्यतरस्याम् बलवान्बली उत्सा
हवान् उत्साही संज्ञायांमन्माभ्यां मनन्तान्मान्ताच्चइनिर्मत्वर्थे प्रथिमिनी
दामिनीह होमिनी सोमिनी संज्ञायांकिम् सोमवान् कंशंभ्यांबभयुस्तितुत
यसः कंशमिति मान्तौकमित्युदकसुखयोरव्ययम् शमिति सुखे आभ्यांसप्तप्रत
याःस्युःअस्त् यसोः सकारः पदत्वार्थः कंवः कम्भः कंयुः कंतिः कन्तुः कन्तः कं
यः शंवः शम्भः शंयुः शन्तिः शन्तुः शन्तः शंयः अनुस्वारस्यैकल्पिकः पर

सि॰
कौ॰
३३९

मवती: वकारयकारपरस्मान्नासिकौ वयौ तुन्दिवलिवटेर्भः हृङ्नामिस्त्रा
गिडिर्मत्वर्थे सोपपदो यमिति माधवः तुन्दिभः वलिभः वटिभः पामादित्वाद्वलिनो
पि अहंशुभमोर्युस् अहंयुः अहंकारवान् शुभंयुः शुभान्वितः मकारः पद
संज्ञार्थः इति मत्वर्थीयाः प्राग्दिशो विभक्तिः दिक्शब्देभ्यः सप्तमी पञ्चमीप्र
थमान्तेभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः वक्ष्यति ततः यतः
पंचम्यास्तसिल् तसिलादीनां विभक्तित्व+स्वरश्च इतः इह ऽ इदमितिविभक्तेरु

+तेषु प्रयोजनं त्यदादिविधयः इदमो विभक्तिः+

८५

दाबवंसिद्धंभवति अथस्वार्थिकाःप्रत्ययाः समर्थानामितिप्रथमादितिनिवर्ति

हमंवाइतिन प्रवर्ततेएव किंसर्वनामबहुभ्योऽद्व्यादिभ्यः किमःसर्वनाम्नो

बहुशब्दाच्चेतिप्राग्दिशोविधिक्रियते किमःसर्वनाम्नोबहुशब्दाच्चप्रत्ययोवेदि

तव्याः द्व्यादीन्वर्जयित्वा सर्वनामत्वात्प्राप्तेग्रहणेद्व्यादिपर्युदासःक्रियतेकुतः

कुत्र यतःयत्र अद्व्यादिभ्यइकिम् द्वाभ्यांद्वयोः प्रकृतिपरिसंख्यानंकिम् द्वत्वा

त द्वते प्राग्दिशाइमेव वैयाकरणपाशाः सर्वनामत्वादेवसिद्धेकिमोग्रहणं।

ह्यादिपर्युदासार्थम् बहुग्रहणं संख्याग्रहणमिह न भवति बहोःसूपात् ब
होस्सूपेइति इदम इश् प्राग्दिशीये परे शकारः सर्वादेशार्थः इतः इत एतेतौ
रथोः रेफादौ थकारादौ च प्राग्दिशीये परतः इदमो यथासंख्यं एत इत इत्ये
तावादेशौ स्तः इशोपवादः इदमो र्हिल् एतर्हि इदमश्थमु इत्थम् एतदोऽन्
योगविभागः कर्तव्यः एतदः एतदः एतेतौ स्तः रथोः एतर्हि इदप अत्र एता
दइमेव अनेकाल्त्वात्सर्वादेशः अतः सर्वस्य सोऽन्यतरस्यां दि प्राग्दिशीये दः।

कारादौ प्रत्यये परे सर्वशब्दस्य सो वा स्यात् सर्वदा सदा पंचम्यास्तसिल् पंचम
म्येभ्यः किमादिभ्यस्तसिल् स्याद्वा नेतस्य किमादिभ्यः परस्य तसेस्तसिलादेशो
भवति स्वार्थे विभक्त्यर्थे च वचनम् अनहोः किमः कः स्यात् तादौ हादौ च ।
विभक्तौ परतः कुतः कस्मात् यतः ततः इतः अतः अमुतः द्यादेस्तु द्वाभ्याम् प
र्येभिर्भ्यां च ग्राम्भ्यां तसिल् स्यात् सर्वाभ्यां पार्श्वाभ्यामेव परितः सर्वत इत्यर्थः अभितः उ
भयत इत्यर्थः समया निकषा कुत्र यत्र तत्र बहुत्र इदमो हः अलोपवादः इत्यादि ।

सि.
कौ.
३५१

शाः इह किमोत् वाग्रहणमनुवर्तते सप्तम्यन्तात्किमः अत् वा स्यात् पक्षे त्रल्
क्वाति किमः क्वादेशः स्यात् अति क्व कुत्र वा ह च छन्दसि कुहस्थः कुहज
ग्मथुः एतदस्त्रतसोस्त्रतसौ चानुदात्तौ अन्वादेशविषये एतदोऽश् स्यात्।
स चानुदात्तः त्रतसोः परतस्तौ चानुदात्तौ स्तः एतस्मिन्ग्रामे सुखं वसामः अ
थो अत्राधीमहे अतो न गन्तास्मः इतराभ्योऽपि दृश्यन्ते पञ्चमीसप्तमीतरवि
भक्त्यन्तादपि तसिलादयो दृश्यन्ते दृशिग्रहणाद्भवदादियोग एव स भवा

न् ततोभवान् तत्रभवान् तंभवन्तं ततोभवन्तं एवंदीर्घायुः देवानांप्रियः
आयुष्मानित्यादि सर्वैकान्यकिंयत्तदः कालेदा॥सप्तम्यन्तेभ्यएतेभ्यः का
लार्थेभ्यःस्वार्थेदास्यात् सर्वस्मिन्कालेसर्वदा एकदा अन्यदा कदा यदा तदा
कालेइतिकिं सर्वत्रदेशे इदमोर्हिल् सप्तम्यन्तात् कालेइत्येव अस्यापवा
दः अस्मिन्कालेतर्हि कालेकिं इहदेशे अधुना इदमःसप्तम्यन्तात्कालेवा
विनोऽधुना प्रत्ययोभवति स्वार्थेइदमः यमितिलोपः अधुना दानींच इदानीं

नदोदाव नदानदोभावचनमनर्थकं विहितवान् अनद्यतनेर्हिलमनरमा
म् कर्हिकदा यर्हियदा तर्हितदा एतस्मिन्काले एतर्हि सद्यःपरुत्परार्यैष।
मः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥
सप्तम्याः कालइतिचानुवर्तते एतेनिपात्यन्ते समानस्य सभावः द्यश्चा
हनि समानेह्निसद्यः पूर्वपूर्वतरयोःपरभावःउत् आरिच संवत्सरे पू
र्वस्मिन्वत्सरे परुत् पूर्वतरे संवत्सरे पूर्वस्मिन्संवत्सरे परारि इदमइश् समसण् च

मयश्च संवत्सरे अस्मिन्संवत्सरे ऽपेक्षसः यस्मादेश्यद्यहनि यस्मिन्नहनिय
देघवि इदमोऽपाघव अघसर्वादिभ्योऽहभ्योऽहमेद्युम् सर्वस्मिन्नहनि सर्वेद्युः
अन्यस्मिन्नहनि अन्येद्युः उभयोरह्नोरुभयेद्युः द्युश्चोभयाद्वक्तव्यः उभयद्युः
प्रकारवचने थाल् किंसर्व बहुभ्य इति वर्तते समस्याः काल इति निवृत्तम्।
प्रकारार्थेभ्यः किमादिभ्यस्थाल्स्यात् स्वार्थे तेन प्रकारेण तथा यथा सर्वथा।
था इदमस्थमुः थालोऽपवादः एतदोऽपि वाच्यः अनेन एतेन वा प्रकारेण इत्थ्य

म् किमत्र केन प्रकारेण कथम् अतिदेशीयानां विभक्तिसंज्ञानां शेषोऽव
धिः दिक्शब्देभ्यः सप्तमीपंचमीप्रथमान्तेभ्यो दिग्देशकालेष्वस्तातिः स
प्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थे अस्तातिप्रत्ययः
स्यात् पूर्वाधरावराणामसि पुरधवश्चैषाम् एभ्यः अस्तात्यर्थे असिप्रत्ययः
स्यात् तद्योगे चैषां क्रमात् पुर् अध् अव् इत्यादेशाः स्युः अस्ताति च अस्ता
तौ परे पूर्वादीनां प्रागुक्तादेशाः स्युः पूर्वस्यां (पूर्वस्याः) पूर्वा वा दिक् पुरः पुरस्तात् अधो वि

भाषावरस्य अवरस्य अस्तातौपरे अवस्माद्वा अवस्तात् अवरस्तात् एवंदेशेका
लेच दिक्शब्देभ्यः किं ऐन्द्र्यांवसति सप्तम्याद्यन्तेभ्यः किं पूर्वंग्रामंगतः दिग्दे
शकालेभ्यः किं पूर्वकादसिरस्तातिंनबाधते दक्षिणोत्तराभ्यामतसुच् अस्ता
तेरपवादः दक्षिणतः उत्तरतः विभाषापरावराभ्याम् परतः अवरतः परस्तात्
अवरस्तात् अञ्चेर्लुक् अञ्चुप्रत्ययान्ताद्दिक्शब्दादस्तातेर्लुक् लुक्तद्धितलुकि प्रा
च्यां प्राच्यांप्राचीनादिक् प्राक् उदक् एवंदेशेकालेच उपर्युपरिष्टात् अस्ताते

विषयेऊर्ध्वशब्दस्यउपआदेशःरिल् रिष्टातिलौचअस्मयो उपरि उपरिष्टाद्वावस
ति आगतोरमणीयंवा पश्चात् अवरस्यपश्चभावः आतिश्चप्रत्ययःअस्तातेर्विष
ये अवरस्यांदिशिवसतिपश्चाद्वसतिपश्चादागतः पश्चाद्रमणीयम् उत्तराध
रदक्षिणादातिः उत्तरात् अधरात् दक्षिणात् एनबन्यतरस्यामदूरेपञ्चम्याः॥
उत्तरादिभ्यः एनप् वास्यात् अवध्यवधिमतोःसामीप्ये पञ्चमीं विना उत्तरेण
वसति उत्तराद्वसति उत्तरतोवसति उत्तरेणरम्यम् उत्तराद्रम्यम् उत्तरतोर

स्मन्‌ एवमपराह्णमतीस्मादि इह्येके विज्ञत्रादीननन्तवर्म्मदिकशह्ममात्रादेन
एनाह्नः पूर्वेणग्रामं अवरेणग्रामं दक्षिणादाव्‌ अस्तातेर्विषये दक्षिणावसति
अपञ्चम्याइत्येव दक्षिणादागतः आहिचदूरे दक्षिणाहूरे आहिस्मात्‌ वादावृ
दक्षिणाहि दक्षिणा उत्तराच्च उत्तराहि उत्तरा संख्यायाविधार्थेधा क्रियाप्रका
रेवर्त्तमानात्संख्याशब्दात्स्वार्थेधास्यात्‌ एकधाभुंक्ते द्विधागच्छति त्रिधाचतु
र्धा पञ्चधा अधिकरणविचालेच इत्यसंख्यान्तरापादानेसंख्यायाधास्यात्‌ ए

सि॰
कौ॰
३४५

कंराशिंपञ्चधाकुरुते अनेकमेकधाकुरु एकाद्धोध्यमुञन्यतरस्याम् एकश
ब्दात्परस्यधाप्रत्ययस्यध्यमुञादेशोवास्यात् ऐकध्यं एकधा द्वित्र्योश्चधमुञ् द्वा
भ्यांधाप्रत्ययस्यधमुञ्वास्यात् द्वैधं द्विधा त्रैधं त्रिधा धमुञन्तात्स्वार्थेडदर्शनम्
मपिद्वैधानि त्रैधानि एधाच्च द्वित्र्योः संबन्धिनोधाप्रत्ययस्यएधाच् वा
स्यात् द्वेधाद्विधा द्वैधं त्रेधा त्रिधा त्रैधम् याप्येपाशप् याप्यःकुत्सितउपपते।
कुत्सितोभिषक् भिषक्पाशः पूरणाद्भागेतीयादन् शरणप्रमयोग्यतीयस्य।

दत्वामात्तिपदिकाङ्गेस्वार्थेग्रन्थात् स्वार्थेवचनम् द्वितीयोभागः द्वितीय ।
तृतीयोभागस्तृतीयः तीयादीकस्वार्थेवाच्यः तृतीयीकः द्वितीयः तार्त्तीयी
कः तृतीयः नविद्यायाः द्वितीयात्तृतीयाविद्याऽइमेव भागेकादशभ्योऽच्छन्द
सि पूरणप्रत्ययान्ताङ्गे ग्रन् चतुर्थः पञ्चमः सप्तमः षष्ठाष्टमाभ्यांञव चाद
न् षष्ठोभागःषाष्ठः षष्ठः अष्टमः आष्टमः मानपश्वङ्गयो कंन्त्न्कौच षष्ठाष्टम
शाह्माभ्यांक्रमेणकन् लुकौ मानपश्वङ्गे चवात्ये षष्ठकोभागःमानेचेत् अष्ट

सि॰
कौ॰
३५९

मको भागः पञ्चङ्क्षेत् महाविभाषया सिद्धे पुनर्वचनं पूर्वत्राञोनित्यावित्ति

ज्ञापयति एकादाकिनिच्चासहाये एकशब्दादसहायवाचिनः स्वार्थे आकि

निच् प्रत्ययः स्यात् चात्कन्लुकौ एकाकी एककः असहायग्रहणं संख्या

शब्दनिरासार्थम् तदुपादाने हि बहोर्न स्यात् एकाकिनौ एकाकिन इति भू

तपूर्वे चरट् आढ्यो भूतपूर्वः आढ्यचरः सुकुमारचरः दर्शनीयचरः टकारो ङी

बर्थः आढ्यचरी षष्ठ्या रूप्य च षष्ठ्यन्तात् भूतपूर्वे रूप्यः स्याच्चरट् च भूतपूर्वं गृहः

णं प्रत्ययार्थविशेषणं न प्रकृत्यर्थस्य कृत्स्नस्य अभूततद्भावे गौः कृत्स्नः कृत्स्ना-
वः तसिलादिषु रूपप्पाशपिनमात्रप्रत्ययेवत स्त्रीया अभूतपूर्वः स्त्रीयारूपः अ-
तिशायने तमबिष्ठनौ अतिशायः अतिशायने प्रकर्षः निपातनाद्दीर्घत्वम् प्र-
कृतिविशेषणं चैतत् अतिशायविशिष्टार्थवृत्तेः स्वार्थेपत्ततः अयमेषाम-
तिशयेनाढ्यः आढ्यतमः लघुतमो लघिष्ठः तिङश्च तिङन्तादतिशये द्योत्ये
तमप्स्यात् तरममपोचः पतौचमंतौम्लः किमेतिङव्ययघादाम्वद्रव्यप्रकर्षे॥

किमःएदन्तात् तिङःअव्ययाच्चयोघः तदन्तात् आमुप्रत्ययःस्यात् नतुद्र
व्यप्रकर्षे किंतमां प्राह्णेतमां पचतितमाम् उच्चैस्तमाम् द्रव्यप्रकर्षेतु उ
च्चैस्तमस्तरुः द्विवचनविभज्योपपदेतरबीयसुनौ द्वयोरेकस्यनिर्धारणेवि
भज्येचोपपदेसुप्तिङन्तादेतौस्तः पूर्वयोरपवादः अयमनयोरतिशयेनल
घुः लघुतरः लघीयान् उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः अजादीगु
णवचनादेव इष्ठनीयसुनौ गुणवचनादेवस्तः पटीयान् पटिष्ठः लघीया

न लघिष्ठः नेह पाचकतरः पाचकतमः तुश्छन्दसि तुरिति तृन्तृचोः सामान
ग्रहणम् तृन्तृजन्तादिष्ठनीयसनौ स्तः तुरिष्ठेमेयस्सु तृशब्दस्य लोपः स्यात् प
रेषु अतिशयेन कर्ता करिष्ठः अतिशयेन दोग्ध्री दोहीयसी धेनुः प्रशस्यस्य
श्रः अस्य श्रादेशः स्यात् अजाद्योः परयोः प्रकृत्यैकाच् इष्ठादिष्वेकाच् प्रकृत्या
स्यात् श्रेष्ठः श्रेयान् ज्य च ज्येष्ठः ज्यादादीयसः आदेः परस्य ज्यायान् वृद्धस्य च वृद्ध
स्य ज्यादेशः स्यात् अजाद्योः ज्येष्ठः ज्यायान् अन्तिकबाढयोर्नेदसाधौ अजाद्यो ः

सि॰
कौ॰
३४८

नेदिष्ठः नेदीयान् साधिष्ठः साधीयान् स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि
परं पूर्वस्य च गुणः एषां यणादिपरं लुप्यते पूर्वस्य च गुणः इष्ठादिषु स्थविष्ठः द
विष्ठः यविष्ठः ह्रसिष्ठः क्षेपिष्ठः क्षोदिष्ठः एवमीयसुन् ह्रस्वक्षिप्रक्षुद्राणां पृथ्वा
दिमान् ह्रसिमा क्षेपिमा क्षोदिमा प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदी
र्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः प्रियादीनां क्रमा
त्प्रादयः स्युरिष्ठादिषु प्रेष्ठः स्थेष्ठः स्फेष्ठः वरिष्ठः बंहिष्ठः गरिष्ठः वर्षिष्ठः त्रपिष्ठ :

द्राघिष्ठः वृंदिष्ठः एवमीयसुन् प्रियोरुबहुलगुरुदीर्घाणां इष्ठादिष्वेमाद
मादि बहोर्लोपो भू च बहोः बहोः परयोरिमेयसोर्लोपः स्यात् बहोश्च भूरा
देशः भूमा भूयान् इष्ठस्य यिट् च बहोः परस्येष्ठस्य लोपः स्यात् यिडागमश्च भूयिष्ठः
युवाल्पयोः कनन्यतरस्याम् एतयोः कनादेशः स्यात् इष्ठेयसोः कनिष्ठः क
नीयान् पक्षे यविष्ठः यवीयान् अल्पिष्ठ इत्यादि विन्मतोर्लुक् विनो मतुपश्च
लुक् स्यात् इष्ठेयसोः अतिशयेन स्रग्वी स्रजिष्ठः स्रजीयान् अतिशयेन त्वग्वान्

नविष्ठः नवीयान् प्रशंसायांरूपप् सुबन्तात्तिङन्ताच्च प्रशस्तः पटुः पटुरूपः प्र
शस्तंपचति पचतिरूपम् ईषदसमाप्तौकल्पब्देश्यदेशीयरः ईषदूनो विद्वा
न् विद्वत्कल्पः यशस्कल्पंयजुष्कल्पंविद्वद्देश्यः विद्वद्देशीयः पचतिकल्प
म् विभाषासुपोबहुच्पुरस्तात् ईषदसमाप्तिविशिष्टेर्थे सुबन्ताद्बहुज्वास्या
त् सचप्रागेवनतुपरतः ईषदूनः पटुः बहुपटुः पटुकल्पःसुपः किम् तिङन्ता
न्माभूत् यजतिकल्पम् प्रकारवचनेजातीयर् प्रकारवतिचायम् स्यात् न

यकारमात्रे यङः यकारः यङ्जातीयः आगिवान्तः इवेशतिकृतोऽङ्गस्य तः

प्राक् काधिकारः अव्ययसर्वनाम्नामकच्प्रा— निर्देशमनुवर्तते कस्मा

वदः कान्ताव्ययसर्वनाम्नः टागन्नादेशःस्यात् अकच्च ज्ञाते कस्मायसर्वाः अव्य

काः उच्चकैः नीचकैः सर्वके विश्वके उकारोमकारभकारादौऽपि सर्वना

म्नोटेः प्राक् अकच् युवकयुष्मकाभिः अस्मकाभिः यकारसकारेत्यादिकिं

त्वमीमःकाम वेक्रयः भिन्नादन्यादव्यापरः त्वस्मीकामास्ते पीलेकोमलोप

सि॰
कौ॰
३५०

ष्व नसंसीशीलस्कसीकाः पचतकि जल्पतकि धिक धकिक हिरुक हिरकु

त पृथक पृथकत कुत्सिते कुत्सितोश्वः अश्वकः संज्ञायां कन् कुत्सिते।

कन् स्यात् तदन्ते चेत्संज्ञा गम्यते शूद्रकः बाधकस्वार्थं वचनम् अनुकम्पा

याम् पुत्रकः अनुकम्पितः पुत्र इत्यर्थः नीतौ च तद्युक्तात् सामदानादिरू

पायानीतिस्तस्यां गम्यमानायां अनुकम्पायुक्तात्प्रत्ययः स्यात् हन्त ते धान

काः हन्त ते गुडकाः हन्त ते तिलकाः एहकि अहकि पूर्वेनानुकम्प्यमाना

स्नमयः ग्रेनेनत्नपरम्परासम्बन्धेऽपीतिविशेषः बह्वचोमनुष्यनाम्नष्ठज्वा ॥

र्वक्तव्यह्वयविषयेबह्वचः प्रातिपदिकात् मनुष्यनामधेयाद्धादप्रस्मात् व

नित्यंचोच नैवबह्वचोमनुष्यनाम्नः चवद्दत्तबु ठेपत्तौ प्रत्ययौस्तः चका

राद्यथाप्राप्तंच ठजादावर्धंद्वितीयादचः श्रमित्यकरणेयाःठः श्रजादि

प्रत्ययाःच नमित्यवेप्रकृते द्वितीयादचस्सर्वेऽऊर्ध्वलुप्यते अनुकम्पितो

देवदत्तः देविकः देवियः देविलः देवदत्तकः अनुकम्पितोवायुदत्तकः वा

घकः ठच्प्रकरणस्थको द्वितीयत्वेकविधानार्थम् वायुदत्तकः वायुकः पितृकः
चतुर्थादशः ऊर्ध्वस्य लोपो वाच्यः प्रतुकम्पितो बृहस्पतिदत्तको बृहस्पतिकः अ
नजादौ च विभाषा लोपो वक्तव्यः देवदत्तकः देवकः लोपः पूर्वपदस्य च दत्तिकः
देवकः लोपः पूर्वपदस्य च दत्तिकः दत्तियः दत्तकः विनापि प्रत्ययं पूर्वोत्त
रपदयोर्वा लोपो वाच्यः देवदत्तः दत्तः सत्यभामा भामा सत्या उवर्णाल्ल इलस्य वा
भानुदत्तः भानुलः ऋवर्णादपि सवित्रियः सवित्रिलः चतुर्थादनजादौ वा

लोपः पूर्वपदस्य च अप्रत्यये तथैवेष्टः उवर्णाल्ल इलस्य च प्राचामुपादेर

डज्वुचौ च उपशाद्दस्वा प्रातिपदिकात् पूर्वपदविषये ऽडच् वुच् पतौ स्तः वा

यथाप्राप्तं चाग्रहणं समुच्चयार्थम् अनुकम्पित उपेन्द्रदत्तः उपडः उपकः उपि

कः उपियः उपिलः उपेन्द्रदत्तकः षड्पाणि जातिनाम्नः कन् मनुष्यनाम्न

इमेव जातिशब्दो मनुष्यनामधेयो ऽस्मात्कन् स्यात् अनुकम्पायां नीतौ च

सिंहकः शरभकः द्वितीये ऽनच्यतरैवेन्न दादेर्लोपो वक्तव्यः कहोडः कहिक ः

एकाक्षरपूर्वपदानामुत्तरलोपो वक्तव्यः वागाशीर्दत्तः वाचिकः कथं षड
ङ्गुलीदत्तः षडिक इति षषः ठाजादिवचनात्सिद्धम् शेवलसुपरिविशाल
वरुणार्यमादीनां तृतीयात् एवं मनुष्यनाम्नो भाजादौ तृतीयादचः ऊर्ध्वं
लोपः स्यात् पूर्वस्यापवादः अनुकम्पितः शेवलदत्तः शेवलिकः शेवलिय ः
शेवलिलः सुपरिकः सुपरियः सुपरिलः एवं विशालिकः वरुणिकः अर्य
मिकः अजिनान्तस्योत्तरपदलोपश्च अजिनान्तान्मनुष्यनाम्नः अनुकम्पा

यांकन् तमवेतरपदलोपः अनुकम्पितो व्याघ्राजिनो व्याघ्रकः सिंहकः अ
ल्पे अल्पं तैलं तैलकम् ह्रस्वे ह्रस्वो वृक्षो वृक्षकः संज्ञायां कन् ह्रस्वेदमकाया
संज्ञानरम्यां गम्यायां कन् सर्वस्यापवादः वंशकः वेणुकः कुटीशमीशुण्डा
भ्यो रः ह्रस्वा कुटी कुटीरः शमीरः शुण्डारः कुत्वा डुपच् ह्रस्वा कुतूः कुतुपः कु
तूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान् इत्यमरः कासूगोणीभ्यां ष्टरच् ह्र
स्वत्वविशेषकः कासूः ह्रस्वा सा कासूतरी गोणीतरी वत्सोक्षाश्वर्षभेभ्यश्च तनु

ते वत्सतरः द्वितीयं वयः प्राप्तः उक्षतरः अश्वतरः ऋषभतरः प्रवृत्तिनिमित्ततनु
त्वेऽप्ययम् किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् अनयोः कतरो वैष्णवः यत
रः ततरः महाविभाषया कः यः सः वा बहूनां जातिपरिप्रश्ने डतमच् बहूनां म
ध्ये निर्धारणे डतमच् वा स्यात् जातिपरिप्रश्न इति प्रत्याख्यानमाकरे कतमो भ
वतां कठः यतमः ततमः वाग्रहणमकजर्थम् यकः सकः महाविभाषया यः
सः किमोऽस्मिन्विषये डतरजपि एकाच्च प्राचाम् डतरच् डतमच् च स्यात् अनयो

रेकतरो मैत्रपद्यामेकतमः प्रवक्तेपणेकत्र व्याकरणेकेनधार्विनः येनेतरः

अन्यथेनेतदिष्टोदाहरणं अन्यतिनेइतिन्नुखतः अन्यतेइत्यस्यशागिवीयानां

णेविधिः इवेप्रकृतिकृतौ कत्र कस्मात् अश्वइवप्रतिकृतिः अश्वकः प्रतिकृ

तौकिम् गौरिवगवयः संज्ञायांच इवार्थेकस्मात् समुदायश्चेत्संज्ञा अश्वाश्व

प्रतिकृतिर्यस्त्रस्याः अश्वसदृशस्यसंज्ञायांविहितस्यकनोलुप्स्यात् मनुष्ये

वाच्ये चञ्चातृणमयःपुमान् चञ्चेव चञ्चा जीविकार्थेचापण्ये जीविकार्थंयद

विक्रीयमाणंतस्मिन्वाच्येकनोलुप्स्यात् वासुदेवःशिवःस्कन्दः देवलकानां
जीविकार्थास्वप्रतिकृतिष्विदम् अपण्यइतिकिम् हस्तिकान्विक्रीणीते देवपथा
दिभ्यश्च कनोलुप्स्यात् देवपथःहंसपथःआकृतिगणोयम् वस्तेर्ढञ् इवेत्यनुव
र्त्तते प्रतिकृताविति निवृत्तम् वस्तिरिववास्तेयंवास्तेयी शिलायाढः शिलाया
इतियोगविभागात् ढञपीत्येके शिलेव शिलेयं शैलेयं शाखादिभ्योयः शाखे
व शाख्यःमुख्यः जघन्यः अग्र्यः शरण्यः द्रव्यंचभव्ये द्रव्यमयंब्राह्मणः कुशाग्राच्छ ।

कुशाग्रमिव कुशाग्रीया बुद्धिः समासाच्च तद्विषयात् इवार्थविषयात्समासाच्छः
स्यात् काकतालीयो देवदत्तस्य वधः इह काकतालसमागमसदृशश्चौरसमागम
इति समासार्थः तत्प्रयुक्तः काकमरणसदृशास्तत्प्रमयार्थः अजाकृपाणीयः अत
र्कितोपनत इति फलितोऽर्थः शर्करादिभ्योऽण् शर्करेव शार्करम् अङ्गुल्यादिभ्यष्ठ
क् अङ्गुलीवाङ्गुलिकः भरुजेव भारुजिकः एकशालायाष्ठजन्यतरस्याम् ए
कशालायाष्ठजादिवार्थे ठद्वापदे ठक् एकशालेव एकशालिकः ऐकशालिकः क

सि॰
कौ॰
३५५

र्कलोहितादीकक् कर्कः शुक्लोऽश्वःसइवकार्कीकः लौहितीकः स्फटिकः

पूगाञ्ञ्योऽग्रामणीपूर्वात् इवार्थो निवृत्तः नानाजातीया अनियतवृत्तयः अर्थ

कामप्रधानाः संघाः पूगाः तद्वाचकात्स्वार्थे ञ्यः स्यात् लौहितध्वज्यः व्रातच्

फञोरस्त्रियाम् व्रातकापोतपाक्याः कौञ्जायन्याः ब्राध्नायन्याः आयुधजी

विसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् वाहीकेषु य आयुधजीविसंघास्तद्वा

चिनः स्वार्थे ञ्यट् क्षौद्रक्यः मालव्यः डित्वान्ङीप् क्षौद्रकी आयुधेति किम् मल्लाः

संघेतिकिम् सम्राट् वाहीकेष्विकिं शावराः अब्राह्मणेतिकिम् गोपालकाः
शालंकायनाः ब्राह्मणेतद्विशेषग्रहणम् वृकाट्टेण्यण् आयुधजीविसंघात्
स्वार्थेट्टेण्यण् वार्केण्यः आयुधेतिकिम् जातिशब्दान्माभूत् कामक्रोधौमनु
ष्याणांखादितारौवृकाविव दामन्यादित्रिगर्भषष्ठाच्छः दामन्यादिभ्यः त्रिगर्त
षष्ठेभ्यश्च आयुधजीविसंघवाचिभ्यः स्वार्थेच्छःस्यात् त्रिगर्ताः षष्ठोयेषांतेत्रिगर्तषष्ठा ः
आहुस्त्रिगर्तषष्ठांस्तुकौण्डोपरथदाण्डकी क्रौष्टकि जालमानिश्चब्रह्मगुप्तोथ

जानकिः दामनीयः दामनीयौ दामनयः औलपि औलपीयः त्रिगर्तकौण्डोप
रथीयः दाण्डकीयः पर्श्वादियौधेयादिभ्यामणञौ आयुधजीविसंघवाचिभ्यः
पर्श्वादिभ्यः क्रमादणञौ स्तः स्वार्थे पार्शवः पार्शवौ यौधेयः यौधेयौ यौधेयाः अभि-
जिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् अभिजिदादिभ्यः
अनन्तेभ्यः स्वार्थे यञ् स्यात् अभिजितोऽपत्यमाभिजित्यः वैदभृत्यः शालावत्यः
शैखावत्यः शामीवत्यः और्णावत्यः श्रौमत्यः आदयस्तद्राजाः पूगाञ्ञ्य इत्यारभ्यो

क्राः एतत्संज्ञाः स्युः तेनास्त्रियां बहुषु लुक् लोहितध्वजाः कपोतपाकाः कौं
ञ्जायनाः ब्राध्नायनाः इत्यादि पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च लोपवचनम्
नैमित्तिकत्वार्थम् अनेन स्थानिवत् पादःपत् तद्धितार्थे इति समासे कृते प्रत्य
यः वुन् नेत्स्त्रियामेव द्वौ द्वौ पादौ ददाति द्विपदिकां ददाति द्विशतिकाम् पादश
तग्रहणमनर्थकमन्यत्रापि दर्शनात् द्विमोदकिकाम् दण्डव्यवसर्गयोश्च वु
न् स्यात् अवीप्सार्थमिदम् द्वौ पादौ ददाति द्विपदिकाम् द्विपदिकां व्यवसृजति

सि॰
कौ॰
३५८

ददातीत्यर्थः स्थूलादिभ्यः प्रकारवचने कन् जातीयरोऽपवादः स्थूलप्रकार ः
स्थूलकः अणुकः चञ्चद्बृहतोरुपसंख्यानम् चञ्चत्कः बृहत्कः सुरायाअहौ सु
रावर्णोऽहिः सुरकः अनत्यन्तगतौ क्तात् छिन्नकम् भिन्नकम् नसामिवच
ने सामिपर्याये उपपदे ज्ञापकात्कन् सामिकृतं अर्धकृतं अनत्यन्तगतेरिह शब्दे
नैवाभिधानात्स्वैणकन्नप्राप्तः इदमेवनिषेधसूत्रमनत्यन्तस्वार्थिकमपिक
न्नंज्ञापयति बृहतिकम् बृहत्याआच्छादने कन्स्यात् द्वौप्रवारोत्तरासङ्गौस

मौहूहतिकानया आच्छादनेकिम् हूहतीच्छन्दः अषडक्षाशितंग्वलंकर्मा

लंपुरुषाध्युत्तरपदात् खः स्वार्थे अषडक्षीणो मन्त्रः द्वाभ्यामेव कृतः सर्वार्थः आ

शितागावोस्मिन्निस्मा शितंगवीनमरण्यम् निपातनात्सर्वं सप्तमी अलंकर्म

मीणे अलंकर्मीणः अलंपुरुषीणः ईश्वराधीनः नित्यो यावः उत्तरसूत्रे विभा

षाग्रहणात् अमेपिके विन्दार्थिकानित्यमिथ्येन्न नमादयः प्राक्तनः आ

दयः प्रागुक्तः समासान्ताश्चेति विभाषाञ्चेरदिक्स्त्रियाम् अदिक्स्त्रीवृत्तेरञ्च

ञ्चत्यन्तात्प्रातिपदिकात् खः स्याद्वा स्वार्थे प्राक् प्राचीनं प्रत्यक् प्रतीचीनं अवाक् अ
वाचीनं निरुक्तप्रशक्ति कृशार्वेरेफयाप्पाय मावमा इत्यमरः अर्वन्तमञ्चतीति॥
अर्वाक् अर्वाचीनं अदिक्स्त्रियां किं प्राची दिक् प्रतीची दिक् उदीची दिक् दि
ग्ग्रहणं किम् प्राचीना ब्राह्मणी स्त्रीग्रहणं किम् प्राचीनं ग्रामादाम्राः जात्यन्ता
च्छ बन्धुनि ब्राह्मणजातीयः बन्धुनि किम् ब्राह्मणजातिः शोभना जातेर्व्यञ्ज
नकं द्रव्यं बन्धु स्थानान्ताद्विभाषा सस्थानेनेति चेत् सस्थानेन तुल्येन चेत् स्था

नात्मर्थवदित्यर्थः पितृस्थानीयः पितृस्थानः सस्थानेन किं गोस्थानम् ।
अनुगादिनष्टक अनुगदतीति अनुगादीमण्वानुगादिकः विमारिणाम
नेय अपरस्मात् वैमानिकाः मनेयकिम् विमारणीदेवतः सांख्यायाः क्रियाभ्या
हृतिगणनेकृतमेव अभ्याहृतिर्जन्मक्रियाजन्मगणनहेतैः सांख्याशाह्यास्या
र्थेकृतमेवस्मात् पंचकृतोभंके साख्यायाः किम् भूतिवारान्भंके द्विविचत
र्भःमेव कृतमेवोपवादः द्विर्भंके त्रिरात्मस्यवतः पकमसकृस्य सकृदि

सि॰
कौ॰
३५५

ऩ्तहल्या विति अभैक्षीदित्यत्र सि
वत्वस्य लोपिनद योगात् +

स्यादेशः स्यात् वास्तव् सकृद्भुंक्ते संयोगान्तस्येति सवो लोपः न+विभाषाब
हार्थाः विप्रकृष्टकाले अविप्रकृष्टआसन्नः बहुधा बहुकृत्वो वादिवसस्य
भुंक्ते आसन्नकाले किम् बहुकृत्वो मासस्य भुंक्ते तमपकृतवचनेमयट् प्राचु
र्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनं भावे अधिकरणे वा ल्युट् आद्ये प्र
कृतमन्नमयं अपूपमयम् यवागूमयम् द्वितीये अन्नमयो यज्ञः अपूपम
यं पर्व समूहवच्च बहुषु साम्हिकाः प्रकृताः मौदकिकं मोदकमयं शा

८५

ष्कुलिकम् शाष्कुलीमयम् द्वितीयेर्थे मोदकिको यतः मोदकमयः अनन्ता

वसथेतिहभेषजाञ्ञ्यः अनन्त एवानन्त्यम् अवसथ एवावसथ्यं इतिहेतिनिपा

तसमुदायः ऐतिह्यम् भेषजमेव भैषज्यम् देवतान्तात्तादर्थ्ये यत् अग्निदेवता

यै इदं अग्निदेवत्यम् पितृदेवत्यम् पादार्घाभ्यां च पादार्थमुदकं पाद्यं अर्घ्य

म् नवस्य नूआदेशस्त्नप्तनप्खाश्च प्रत्ययाः नूत्नं नूतनं नवीनम्

नश्च पुराणे प्रात् प्रणो वर्तमानात्सप्ताहात् नो वक्तव्यः सामर्थ्यात्काः प्रणं प्रत्नं

प्रतनं प्रीणम् भागरूपनामभ्योधेयः भागधेयं रूपधेयं नामधेयम् आग्नीध्र
साधारणादञ् आग्नीध्रं साधारणं स्त्रियांङीप् आग्नीध्री साधारणी अतिथेर्ञ्य
तादर्थ्य इत्येव अतिथय इदं आतिथ्यम् देवात्तल् देव एव देवता अवेःकः अवि
कः यावादिभ्यःकन् याव एव यावकः लोहितान्मणौ लोहित एव मणिः लो
हितकः वर्णे चानित्ये लोहितकः कोपेन लोहितात् लिङ्गबाधनं वा लोहितिका
लोहिनिका कोपेन रक्ते लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात् कन्स्यात् लो

हितकः पटः लिङ्गबाधनं वा एवमेव लोहितिका लोहिनिका शाटी कालाच्च वर्णे
चानित्ये रक्ते इति द्वयमनुवर्तते कालकं मुखं वैलक्ष्येण कालकः पटः कालिका
शाटी विनयादिभ्यष्ठक् विनय एव वैनयिकः उपायाद्ध्रस्वत्वं च औपयिकः वा
चो व्याहृतार्थायाम् सन्दिष्टार्थायां वाचि विद्यमानाद्वाचः स्वार्थे ठक् सन्देश
वाग्वाचिकं स्यात् तद्युक्तात्कर्मणोऽण् कर्मैव कार्मणं वाचिकं श्रुत्वा
यमाणं कर्मेत्यर्थः प्रज्ञादिभ्यश्च प्रज्ञ एव प्राज्ञः प्राज्ञी स्त्री दैवतः बान्धवः एवमे

रजातौ स्वार्थेऽण् औषधं पिबति अजातौ किम् ओषधयः क्षेत्रे रूढाः मृदस्ति
कन् मृदेव मृत्तिका सस्नौ प्रशंसायाम् रूपपोऽपवादः प्रशस्ता मृत् मृत्स्ना मृ
त्सा उभयत्रान्यतरस्याम् ग्रहणाद्विकल्पोऽयम् बह्वल्पार्थाच्छस्कारकादन्यतरस्या
म् बहूनि ददाति बहुशः अल्पानि अल्पशः बह्वल्पार्थान्मङ्गलामङ्गलवचनम्
नेह बहूनि ददात्यनिष्टेषु अल्पं ददात्याभ्युदयिकेषु संख्यैकवचनाद्वीप्सायाम्॥
द्वौ द्वौ ददाति द्विशः माषं माषं माषशः प्रस्थशः परिमाणशब्दा वृत्तावेकार्था ए

व सैवैकवचनात्किम् यद्यदं ददाति वीप्सायां किं द्वौ ददाति कारकादिभेव
द्वयोः द्वयोः स्वामी प्रतियोगे पञ्चम्यास्तसिः प्रतिना कर्मप्रवचनीयेन योगे याप
ञ्चमी विहिता तदन्तात्तसिः स्यात् प्रद्युम्नः कृष्णतः प्रति आद्यादिभ्य उपसंख्यानम्
आदौ आदितः मध्ये मध्यतः पृष्ठतः पार्श्वतः आकृतिगणोयम् स्वरेण स्वरतः व
र्णतः अपादाने चाहीयरुहोः अपादाने या पंचमी तदन्ताद्वा तसिः स्यात् ग्राम
दागच्छति ग्रामतः अहीयरुहोः किम् स्वर्गाद्धीयते पर्वतादवरोहति अतिग्रहा

व्यथनक्षेपेष्वकर्तरि तृतीयायाः अकर्तरि तृतीयान्ताद्वा तसिः अतिक्रमग्रहः अ
तिग्रहः चारित्रेणातिगृह्यते चारित्रतोतिगृह्यते चारित्रतोतिगृह्यते चारित्रेणान्या
नतिक्रम्य वर्तत इत्यर्थः अव्यथनमचलनं वृत्तेन न व्यथते वृत्ततो न व्यथते वृत्तेन न
चलतीत्यर्थः क्षेपे वृत्तेन क्षिप्तः वृत्ततः क्षिप्तः वृत्तेन निन्दित इत्यर्थः अकर्तरि किं
देवदत्तेन क्षिप्तः हीयमानपापयोगाच्च हीयमानपापयुक्तादकर्तरि तृतीया
न्ताद्वा तसिः वृत्तेन हीयते वृत्ततो हीयते वृत्तेन पापः वृत्ततः पापः क्षेपस्याविव॰

तायामिदम् तेपेतर्शैर्वाणमिद्धः प्रकर्त्तेरिति किम् देवदत्तेनहीयते षष्ठाया

श्चेये षष्ठन्त्राह्वानमिः नानापत्तममाश्चेयेदेवा श्रर्ज्जनत्त श्रभवन् श्रर्ज्जन

स्पतेरुन्तर्थः व्याश्चेयेकिम् हृत्तस्पशाला रोगाख्यापनयेने रोगवाचिनः

षष्ठन्त्राह्वानमिः विकित्सायां प्रवाहिकानः ऊत्पत्तीकारमस्याः ऊर्विंत

र्थः स्रपनयनेकिम् प्रवाहिकायाःप्रकोपंकरोति कूभ्रस्त्रियोगेमम्यधक

तेरिष्विः श्रभूततद्भावइतिवकृत्यम् विकारात्मतांप्राप्नुवन्तांप्रकृतौवर्त्त

सि॰
कौ॰
३९३

मानाद्धिकारशाहान्त्वार्थेष्विर्धास्यात् कंसोम्नादिभिर्योगे ग्रस्ययौ ग्रवर्णस्य
ईस्यात् ष्यौवेर्लोपः स्यन्नन्तादव्ययवं ग्रकृत्सः कृत्सः सम्पद्यतेतंकरोति क्र
सीकरोति ग्रली भवति गङ्गीस्यात् ग्रव्ययस्य चावीत्वंनेतिवाच्यम् दोषाभूत
महः दिवाभूतारात्रिः पत्तद्याव्ययीभावाच्चेति सूत्रे भाष्ये ऽकृत्सम् कस्यौ च ह
लः परस्यापत्यकारस्य लोपः स्यात् केच्यौ च परतः गार्गीभवति च्वौ च हौ परे
पूर्वस्य दीर्घः स्यात् शुचीभवति पहूस्यात् ग्रव्ययस्य दीर्घत्वं नेति केचित् नविर्मि

लम् स्वस्तिसादिति नुमहादिभाषयास्येरभावेमिद्धम् स्वस्तीसादितिनुपदेस्या

दितिचेत् श्रुतं यदितेष्वाने तदर्थनभिधानात्। स्थिरेवनोत्पद्यतेइत्यस्तरीदुःजाःमा

गीकरोति धुरुमेनस्वत्वस्येतोरंहरोजसंलोपस्य पर्धालोपःस्यात् स्थिस्व शुरयक

रोति उन्मनीस्यात् उन्मन्करोति विवेनीकरोति विरंहीकरोति विरजीकरो

ति विभाषासातिःकार्त्स्न्ये स्विविषये सातिर्वास्यात् साकल्येसात्पदाद्योः सम

स्तं वेनस्यात् दधिसिंचति कृत्स्नंशस्त्रमग्निःसंपद्यतेअग्निसाद्भवति अग्नीभवति ॥

सि॰
कौ॰
३९५

महाविभाषयावाक्यमपिकार्त्स्न्येकिम् एकदेशेनशुक्लीभवतिपटः अभि॰
विधौसंपदाच संपदाकृभ्वस्तिभिर्योगेसातिर्वास्यात् व्याप्तौ पक्षेकृभ्वस्ति
योगेच्विःसंपदातुवाक्यमेव अग्निसात्संपद्यते अग्निसाद्भवति शस्त्रं अग्नी
भवति जलसात्संपद्यते जलीभवतिलवणंएकस्याव्यक्तेः सर्वावयवाव
च्छेदेनान्यथाभावः कार्त्स्न्यम् बहूनांव्यक्तीनांकिंचिदवयवावच्छेदेनाप
प्यात्मत्वमभिविधिः तदधीनवचने सातिःस्यात् कृभ्वस्तिभिः संपदाचयो

ने राजसात्सम्पद्यते राजाधीनमित्यर्थः देये त्रा च तदधीने देये त्रा स्यात् सा
तिश्च कृभ्वादियोगे विप्राधीनं देयं करोति विप्रत्राकरोति विप्रत्रासंपद्यते
पद्यते विप्रसात्करोति देये किं राजसाद्भवति राष्ट्रम् देवमनुष्यपुरुषपुरुम
र्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् एभ्यो द्वितीयासप्तम्यन्तेभ्यस्त्रा स्यात्
देवत्रा वन्दे रमे वा बहुलोक्तेरन्यत्रापि बहुत्रा जीवतो मनः अव्यक्तानुक
रणाद्द्व्यजवरार्धादनितौ डाच् द्व्यच् अवरं स्वं नन्ततनोऽस्वं अनेकाजिति ।

सि॰
कौ॰
३८५

यावत् तादृशमर्धं यस्य तस्माड्डाच् स्यात् कृभ्वस्तिभियोगे डाचि विवक्षिते द्वे ब
हुलम् नित्यमाम्रेडिते डाचीति वार्तिकम् डाच्परं यदाम्रेडितं तस्मिन्परे पू
र्वपरयोः पररूपं स्यात् इति तकारपकारयोः पकारः पटपटाकरोति अव्य
क्तानुकरणात्किम् दृषत्करोति द्व्यजवरार्धात्किम् श्रत्करोति अवरेति किं ख
रटाखरटाकरोति त्रपटत्रपटाकरोति अनेकाच् इत्येव न तु स्वरूपग्रहणम्
एवं द्व्यजावरार्धीति परमत्रैस्व हितेत्र वृचे इत्यव्ययम् अनितौ किं पटिति करो

ति कृञोद्वितीयतृतीयशम्बवीजात्कृषौ द्वितीयादिभ्योडाच्स्यात् कृञ् कृ

अपवयोगेकर्षणेर्थे बहुलोक्तेरव्यक्तानुकरणादस्मसङाविनाद्वितम् द्विती

यंतृतीयंकर्षणंकरोति द्वितीयाकरोति तृतीयाकरोति शम्बशब्दःप्रतिलो

मे अनुलोमंकृष्टंक्षेत्रं पुनःप्रतिलोमंकर्षतिशम्बाकरोति बीजेनसहकरोति बी

जाकरोति संख्यायाश्चगुणान्तायाः कृञोयोगेकृषौडाच्स्यात् द्विगुणाकरोति

क्षेत्रंक्षेत्रंकर्मकं द्विगुणंकर्षणंकरोतीत्यर्थः समयाच्चयापनायाम् कृषावि।

सि· कौ·
३८५

तिनिहत्वम् कृञो योगे डाच् स्यात् समया करोति कालं यापयतीत्यर्थः सपत्र
निष्पत्राद् अतिव्यथने सपत्रा करोति मृगं सपुंखशरप्रवेशनेन सपत्रं करोतीत्य
र्थः निष्पत्रा करोति सपत्रस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्रं करोतीत्यर्थः अ
तिव्यथने किम् सपत्रं निष्पत्रं वा करोति भूतलम् निष्कुलान्निष्कोषणे निष्कु
ला करोति दाडिमम् निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्री
हेर्डाच् सुखप्रियादानुलोम्ये सुखा करोति प्रिया करोति गुरुम् अनुकूला च।

रणेनानन्दयतीत्यर्थः दुःखात्प्रातिलोम्ये दुःखाकरोति स्वामिनं पीडयतीत्य
र्थः शूलात्पाके शूलाकरोति मांसं शूलेन पचतीत्यर्थः सत्यादशपथे सत्याक
रोति भाण्डं वणिक् क्रेतव्यमिति तथ्यं करोतीत्यर्थः शपथेन सत्यं करोति विप्रः म
द्रात्परिवापणे मद्रशब्दो मङ्गलार्थः परिवापणं मुण्डनं मद्राकरोति कुमारं मङ्ग
लमुण्डनेन संस्करोतीत्यर्थः भद्राच्चेति वक्तव्यम् भद्राकरोति अर्थः प्राग्वत् प
रिवापणे किम् मद्रङ्करोति भद्रङ्करोति इति तद्धितप्रक्रिया सर्वस्मेहस्तयि।

सि॰
कौ॰
३८१

हृस्व तिमवीप्सयोः अभी देवमपवीप्सायां वघोमेपदस्य द्विर्वचनेस्मात् अभी

तांपतिङन्तेषु वयपसंतकहृदन्तेषुव पचति पचति भक्ता भक्तावीप्सायां ह

तेसिंचति ग्रामोग्रामोरमणीयः परेर्वर्जने परिपरि वङ्गेभ्यो हृष्टोदेवः वङ्गा

न्परिहृत्येत्यर्थः परेर्वर्जनेवाववनेपरिवङ्गेभ्यः उपर्यध्यधसः सामीप्ये उप

र्युपरिग्रामं ग्रामस्योपरिष्टात्समीपेदेशेइत्यर्थः अध्यधिस्वांतंस्वावस्योपरि

ष्टात्समीपकालेइत्यवमित्यर्थः अधोधोलोकं लोकस्याधस्तात्समीपेदेशेइत्य

ये: वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु असूयायां सुन्दर
सुन्दर वृथा ते सौन्दर्यं सम्मतौ देव देव वन्द्योसि कोपे दुर्विनीत दुर्विनीत इदानीं ज्ञा
स्यसि कुत्सने धानुष्क धानुष्क वृथा ते धनुः भर्त्सने चौर चौर घातयिष्यामि त्वाम् एकं बहु
व्रीहिवत् द्विरुक्तम् एकशब्दो बहुव्रीहिवत् स्यात् तेन सुब्लोप पुंवद्भावौ एकैक
मक्षरम् इह ह्वयोः सुपो लुकि सति बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्सुब्
दायाम्भ् एकैकयाहुत्या इह पूर्वभागे पुंवद्भावादयं विशेषः न बहुव्रीहौ

सि॰
कौ॰
३९८

विग्रहप्रदर्शनं बहुव्रीहिग्रहणं सार्थबहुव्रीहिलाभार्थम् तेनातिदिष्टबहुव्रीहौ
सर्वनामतास्त्येवेति शाब्दाः वस्तुतस्तु भाष्यमते प्रत्याख्यानमेवैतत् सूत्रकारम
तेनापि बहुव्रीहावित्यर्थे अलौकिके विग्रहे निषेधकं न तु बहुव्रीहावितीहातिदेशप्रं
केवलात्तिपकैकसैदेहि प्राबाधेव पीडायांघोमायांहेस्तः बहुव्रीहिवत्स्व ग
तगतः विग्रहामीऽसमानस्यपुक्तिः बहुव्रीहिवद्भावात्सुलुक् गतगताद्वद्धृंत्व
द्भावः कर्मधारयवदुत्तरेषु इतउत्तरेषु द्विवचनेषु कर्मधारयवत्कार्यम् प्रयोजनं

९४

सुब्लोपपुंवद्भावान्तोदात्तत्वानि प्रकारे गुणवचनस्य सादृश्ये द्योत्ये गुणवचन
स्य द्वे स्तः तच्च कर्मधारयवत् कर्मधारयवदुत्तरेष्वित्यधिकारात् तेन पूर्वभाग
स्य पुंवद्भावः समासस्यान्तोदात्तत्वं च पटुपटी पटुपटुः पटुसदृशः ईषत्पटुरि
ति यावत् गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्च ग्रहणमत्र शुक्ल
शुक्लं रूपं शुक्लशुक्लः पटः आनुपूर्व्ये द्वे वाच्ये मूले मूले स्थूलाः सम्भ्रमेण प्रवृत्तौ
यथेष्टमनेकधा प्रयोगो न्यायसिद्धः सर्पः २ बुध्यस्व २ क्रियासमभिहारे च लुनी

सि॰
कौ॰
३९५

दि त्वचौ दृ हृसेवाचंल्लनाति नित्यवीप्सयोरिति सिद्धे भृशार्थे द्विर्वार्थमिदम्
पौनः पुन्ये पिलो दामहम्लाश्विमश्वमतोकनोल व्युं वा कर्मव्यतिहारे सर्वनाम्नो द्वे।
वाच्ये समासवच्च बहुलम् बहुलग्रहणादन्यपरयोर्न समासवत् इतरथाहम
ततिरम् असमासवद्भावे पूर्वपदस्य सुपः सुर्वक्तव्यः अन्योन्यं विप्रा नमन्ति अ
न्योन्यौ स्मान् अन्योन्येन कृतम् अन्योन्यस्मै दत्तमित्यादि अन्योन्येषां पुष्करैरामृश
न्तः इति माघः एवं परस्परम् अत्र कस्कादित्वाद्विसर्जनीयस्य सः इतरेतरम् इत्या।

रेतरेत्यादि स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेरम्भावो वा वाच्यः। अन्योन्यां

अन्योन्यं परस्परां परस्परं इतरेतरां इतरेतरं इमे ब्राह्मण्यौ कुले वा भोजयतः। अ

न्ये केचित् अम्भावादेशो द्वितीयाया एव भाष्यादौ तथैवोदाहृतत्वात् तेन स्त्रीनपुंस

कयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः। अन्ये तूदाहरणसदिग्मात्रत्वात्सर्व

विभक्तीनामाम्भावादेशमाहुः। द्वन्द्वेऽप्येतावभावः क्लीबे वादिरहः समासः समासे

मोरल्कैतिसिद्धं बाहुलकाज्जयम्। तथाहि अन्योन्यं परस्परमित्यत्र द्वन्द्वेऽपि

सि॰
कौ॰
३००

टाप्प्राप्तः नच सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः युष्मत्परयोः समासवद्भा
वात् नच द्विर्वचनमेव वृत्तिः यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया नम्रमु
खी बभूवेत्यादावतिप्रसंगात् अन्योन्यं इतरेतरमित्यत्र चाड्डतरादिभ्य इत्यद्
भयासः अन्योन्यसंयुक्तमहस्त्रियामम् अन्योन्याश्रयः परस्पराक्षिसादृश्यम्
अदृष्टपरस्परैरित्यादौ सोर्ध्वक्रयामः सर्वं बाहुलकबलेन समाधेयम् प्र
कृतवार्तिकभाष्योदाहरणं स्त्रियामिति सूत्रे अन्योन्यसंश्रयं त्वेतदिति भाष्ये

वाच्यप्रमाणमिति प्रकृत्योः प्रियसुखयोरन्यतरस्याम् प्रियप्रियेणददा
ति प्रियेणवासुखसुखेनसुखेनवा द्विर्वचनेकर्मधारयवद्भावात्सुपोलुकि
पुनस्तदेववचनम् प्रतिप्रियमपिवस्तुअनायासेनददातीत्यर्थः यथा
स्वयथायथम् यथास्वमितिवीप्सायामव्ययीभावः योयआत्मा यद्यस्वा
त्मीयम् तद्यथास्वं तस्मिन्यथाशब्दस्यद्विर्वचनंनिपात्यते यथायथं।
ज्ञाता यथास्वमित्यर्थः यथात्मीयमितिवा द्वन्द्वंरहस्यमर्यादावचनव्युत्क्र

मणयज्ञपात्रप्रयोगाभिव्यक्तिषु द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावः उ
त्त्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यं
इतरे विशेषणभूताः द्वन्द्वं मन्त्रयन्ते रहस्यमित्यर्थः मर्यादा स्थित्यनतिक्रमः आ
चतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौ
त्रेणापीति मर्यादायां व्युत्क्रमणं पृथगवस्थानम् द्वन्द्वं व्युत्क्रान्ताः द्विवर्गसम्ब
न्धेन पृथगवस्थिताः द्वन्द्वं सङ्कर्षणवासुदेवौ अभिव्यक्तौ साहचर्येणेत्यर्थः

३२२

योगविभागादत्रापिद्वन्द्वइष्यते ॥ इतिद्विरुक्तिप्रक्रिया ॥ ॥ इति
श्रीभट्टोजिदीक्षितविरचितायांसिद्धान्तकौमुद्यांपूर्वा
र्धंसमाप्तम् ॥ ॐतत्सत्शुभम् ॥ संवत्
२८ ॥ शुभमस्तुलेखकपाठकश्रो
तृणाम् ॥ ॥ ॐ ॥

संख्या ६१००